भोट-भारतीय ग्रन्थमाला–१४

कलापव्याकरणम्

(कलाप व्याकरण के सूत्रपाठादि २७ मूलपाठ तथा वैशिष्ट्यबोधक ७ परिशिष्ट)



भोट विद्या संस्थानम्

सम्पादकः

डॉ० जानकीप्रसादद्विवेदः

वाचस्पतिः (D. Litt.)

केन्द्रीय उच्च-तिब्बती-शिक्षा-संस्थान

सारनाथ, वाराणसी

बुद्धाब्दः २५३१] [यीशवीयाब्दः १९८८

बौद्ध-भारतीय ग्रन्थमाला–१४
प्रधान सम्पादक : भिक्षु सम्बोधि रिनपोछे
सम्पादक : आचार्य एडवर्ड समतेन

प्रथम संस्करण : ५५० प्रतियाँ, १९८८ ई०

मूल्य : सजिल्द : रु० ९०-००
अजिल्द : रु० ७५-००

© केन्द्रीय उच्च तिब्बती शिक्षा संस्थान, सारनाथ

प्रकाशक :
केन्द्रीय उच्च तिब्बती शिक्षा संस्थान
सारनाथ, वाराणसी

मुद्रक :
शिवम् प्रिन्टर्स, इण्डियन प्रेस कालोनी,
मलदहिया, वाराणसी–२

BIBLIOTHECA INDO-TIBETICA SERIES-XIV

KALĀPA-VYĀKARAṆAM

(27 Original texts & 7 Specific appendixes of Kalāpa Vyākaraṇa)



भोट विद्या संस्थानम्

Edited by

Dr. Janaki Prasada Dwivedi
D. Litt.

CENTRAL INSTITUTE OF HIGHER TIBETAN STUDIES
SARNATH, VARANASI

2531 B. E. 1988 A. D.

BIBLIOTHECA INDO-TIBETICA SERIES-XIV

Chief Editor : Ven. Samdhong Rinpoche

Editor : Acarya Ngawang Samten

First Edition-550 Copies, 1988

Price : Hardback Rs. 90-00
Paperback Rs. 75-00

© Central Institute of Higher Tibetan Studies, Sarnath

Published by :
Central Institute of Higher Tibetan Studies,
Sarnath, Varanasi-221007 (India).

Printed by :
Shivam Printers
Indian Press Colony, Maldahiya, Varanasi-221002.

प्रकाशकीय

कलाप व्याकरण का प्रक्रिया-लाघव (= सरलता और संक्षेप) की दृष्टि से पाणिनीय परवर्ती व्याकरणशास्त्रों में अपना महत्त्वपूर्ण स्थान है। संस्कृत की शब्दराशि, जिसका क्षेत्र अत्यन्त विशाल है, को अतिलघु काल में बोधगम्य कराने के उद्देश्य से आचार्य शर्ववर्मा-द्वारा विरचित यह ग्रन्थ न केवल भारतवर्ष में ही अत्यन्त प्रचलित रहा, अपितु विदेशों में भी इसका अधिक प्रचार एवं प्रसार हुआ। तिब्बत में इसका प्रवेश बारहवीं शताब्दी में हुआ। तब से आज तक इसके अध्ययन-अध्यापन की परम्परा अविच्छिन्न रूप से चली आ रही है। कलाप-व्याकरण के तिब्बती भाषा में अनूदित ९–१० ग्रन्थ तन-ग्युर संग्रह में सुरक्षित हैं, जिनका अनुवाद लोडो तनपा (ब्लो-ग्रोस्-ब्र्तन-प) आदि आचार्यों ने किया है। तिब्बती आचार्यों ने स्वतन्त्र रूप से इसकी भोट भाषा में भी अनेक टीका-व्याख्याएँ लिखी हैं, जो इस सम्प्रदाय के संरक्षण एवं विकास के लिए एक महत्त्वपूर्ण अवदान है। यद्यपि तिब्बत में संस्कृत-व्याकरण के चार सम्प्रदायों (कलाप, चान्द्र, सारस्वत और पाणिनीय) के अध्ययन-अध्यापन की परम्परा प्रचलित है और तिब्बतीय विद्वानों ने अपनी भाषा में भी वृत्ति-व्याख्याएँ आदि लिखीं तथापि अपेक्षाकृत कलाप व्याकरण के अध्ययन तथा टीका-निर्माण के प्रति विद्वानों की अभिरुचि अधिक ही रही है।

संस्थानीय संस्कृत-प्राध्यापक डॉ० जानकीप्रसाद द्विवेदी ने कलाप व्याकरण का सम्पादन कर आधुनिक शोधपद्धति के माध्यम से इसे अन्वेषण-कार्य के लिए विशेष उपयोगी बनाया है। इसमें पाणिनीय सूत्रों के तुलनात्मक सन्दर्भ भी दिए गये हैं। कलाप व्याकरण की पूर्णता के लिए जितने पाठ परवर्ती आचार्यों ने भी इसके साथ संयोजित किए, उनको भी यहाँ प्रस्तुत किया गया है। व्याख्यांशों को छोड़कर कलाप से सम्बन्धित सभी अंश मूल रूप में यहाँ देखे जा सकते हैं।

अतः इसे प्रकाशित करते हुए हमें पूर्ण विश्वास है कि यह ग्रन्थ विद्वानों एवं छात्रों के लिए महान् उपकारक सिद्ध होगा और व्याकरण-सम्प्रदाय की परम्परा को सुरक्षित रखने में भी इसका महत्त्वपूर्ण योगदान रहेगा।

बुद्धाब्द २५३१
१५ जनवरी, १९८८ ई०

—भिक्षु सम्दोङ् रिनपोछे
प्राचार्य

श्रीः

प्रस्तावना

विविधेषु प्रदेशेषु विभिन्नासु लिपिषु समुपलभ्यमानम्, अल्पमेव मुद्रितं बहुलं चामुद्रितं कातन्त्रवाङ्मयं किं वा कलापवाङ्मयं महता यत्नेन समधीत्य कातन्त्रव्याकरणविमर्शः इति शोधप्रबन्धः पूर्वं प्रणीतो मया, यस्मिन् किल वाराणसेय-संस्कृतविश्वविद्यालयेन १९७२ तम-यीशुवर्षस्य मार्चमासे वाचस्पति (डी० लिट्०) उपाधिः समर्पितः । ग्रन्थोऽयं १९७५ तमे यीशु-वर्षे सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन प्रकाशितः, उत्तरप्रदेशशासनस्य शिक्षाविभागेन विशिष्ट-पुरस्कारेण पुरस्कृतश्चाभूत् । कलापवाङ्मयमधीयानेन मया तदीयं महत्त्वमुपादेयता च काचित् सम्यगवगता । साम्प्रतं तस्मिन् व्याकरणे पाणिनीयानामपि समादरभावो नैव लक्ष्यते, न चापि सूत्रपाठ-धातुपाठ-गणपाठप्रभृति तदीयं मूलभूतं वाङ्मयमेव क्वचिदेकत्र निबद्धमुपलभ्यते । एतेन न कश्चिद् विपश्चिदपि कातन्त्रीयमूलभूतवाङ्मयस्य परिचयं सारल्येनाधिगन्तुं प्रभवति । मूलभूत-कातन्त्रवाङ्मयस्य परिज्ञानार्थमेव मया सूत्रपाठ-धातुपाठादेरेकत्र संग्रहोऽयं प्रस्तूयते ।

महर्षिपाणिनेरुत्तरवर्तिभिराचार्यैर्ये हि बहवो ग्रन्थाः प्रणीताः, तेषु केचिदध्ययनाध्यापनादौ प्रचलिता अभूवन्, केचिच्च ततो बहिर्भूता एवातिष्ठन् । प्रचलितास्तावत् कातन्त्र-चान्द्र-जैनेन्द्र-शाकटायन-सरस्वतीकण्ठाभरण-संक्षिप्तसार-हैम-सारस्वत- मुग्धबोध-सुपद्म - हरिनामामृत-प्रयोगरत्न-मालाख्या ग्रन्था अभिमता विदुषाम् । अप्रचलितेषु केचिद् अत्यन्तं नाध्ययनाध्यापनयोः समाद्रियन्त, केचिच्च समादृता अपि पश्चात् क्षीणप्रभावाः संजाताः । विश्रान्तविद्याधर--सूत्रसारप्रक्रिया-पाणिनीयमतदर्पण-प्रक्रियारत्नमणि-सूत्रसार-सूत्रप्रकाश-पदचन्द्रिका-शिशुबोध-शब्दरत्नाकर-जुमरकौ-मुदी-चैतन्यामृत-गोविन्दव्याकरण-पारसीकप्रकाश–प्रबोधचन्द्रिका–रत्नमहोदधि–रत्नाकर–ऋजुप्राज्ञ-कारिकावली-बालकबोध-द्रुतबोध–वृत्तिदीपिका–राघवेन्द्रीय–पारिजात-आशुबोध-भावसिंह–प्रक्रिया-प्रबोधप्रकाश-प्रक्रियार्णव-दीप-बालशिक्षा- शुद्धाशुबोधाख्यग्रन्थानामध्ययनादावल्पीयानपि न जातः समादरः । बालावबोधन-मलयगिरि-शब्दानुशासन-हरिनामामृताख्या व्याकरणग्रन्थाः पूर्वं प्रचलिता अपि पश्चाद् ग्रन्थरूपेणैवावशिष्टाः समभवन् ।

प्रचलितेषु व्याकरणेषु कातन्त्रव्याकरणं भारतस्य बहुषु प्रदेशेषु पर्याप्तं प्रचलितमा-सीदध्ययनाध्यापनादाविति मया तं तं प्रदेशं स्वयमुपस्थाय संस्थानां विदुषां च सकाशाद् अवगतम् । प्राच्यां वङ्गोत्कलप्रदेशयोः, उदीच्यां कश्मीरप्रदेशे, पश्चिमायां राजस्थान–गुर्जरप्रदेशयोः, दक्षिणस्यां च आन्ध्रमद्रासादिप्रदेशेषु व्याकरणस्यास्याध्ययनाध्यापनादिकं जातम् ।

न केवलं भारते एव, किं च तिब्बत-श्रीङ्का-नेपाल-कम्बोडिया-भूटानप्रभृतिदेशान्तरे-ष्वपि केषुचिदस्य प्रचारो बभूव । तिब्बती-भाषायामुपनिबद्धाः केचिद् ग्रन्थाः Dr. A. C. Burnell महोदयेन The Aindra School of Sanskrit grammarians (P. 59)

ग्रन्थे उद्धृताः--'कलापसूत्रम्, कलापसूत्रवृत्तिः, कलापलघुवृत्तिः, कलापधातुसूत्रम्' चेति।

वस्तुतः कातन्त्रव्याकरणस्य तिब्बतीभाषायामनूदिता एकादश ग्रन्था उपलभ्यन्ते--

१. कलापसूत्रम् (अनुवादकः blo-Gros-brTan-Pa). २. कलापसूत्रवृत्तिः (अनुवादकः Grags-Pa-rGyal-mTsan). ३. धातुकायः (अनुवादकः Rin-Chen-Grub). ४. कलापलघुवृत्तिः शिष्यहिता (अनुवादकः Shi-ba-Hod). ५. शिष्यहिता कलापव्याकरणवृत्तिः (अनुवादकः blo-brTan, Byaṅ-rTse च). ६. कलापधातुसूत्रम् (अनुवादकः-hJam-dPal-Ral-Gri मञ्जुघोषखड्ग). ७. कलापोणादिसूत्राणि (अनुवादकः Nam-mKha-bzaṅ-Po). ८. उणादिवृत्तिः (अनुवादकः rDo-rJe-rGyal-mTsan). ९. कलापसूत्रवृत्तिः स्यादिविभक्तिप्रक्रिया (अनुवादकः bLo-Gros-rGyal-mTsan). १०. त्याद्यन्त-प्रक्रियाविचारः (अनुवादकः rDo-rJe-rGyal-mTsan). ११. त्याद्यन्तस्य प्रक्रियापदरोहणम् (अनुवादकः Dharma-shri Bhadra).

व्याकरणस्यास्य विपुलं वाङ्मयं शारदा-वङ्ग-उत्कल-ग्रन्थ-देवनागराद्यक्षरैर्निबद्धं हस्तलेखेषु समुपलभ्यते। वङ्गाक्षरेषु नागराक्षरेषु च केचिद् मुद्रिता अपि ग्रन्थाः सन्ति, परं धातु-गण-उणादि-लिङ्गानुशासन-परिशिष्ट-परिभाषा-शिक्षादिसूत्राणि प्रायेण विविधलिपिमयेषु हस्तलेखेष्वेव विकीर्णानीति तानि महताऽऽयासनैव लब्धुं शक्यन्ते, तत्रापि लिपिकाराणां बहुत्र प्रमादात् पाठविसंवादा भ्रष्टपाठा अवाच्यपाठाश्च वर्तन्ते, येन ग्रन्थकाराभिप्रायपरिज्ञानं दुष्करमेव प्रतिभाति। तत्समाधानार्थं प्रयत्नविशेषेण मुद्रितान् हस्तलिखितांश्च ग्रन्थान् समधीत्य शुद्धपाठनिश्चयपुरस्सरं धातुपाठादिकं मया संगृहीतम्। तदेव ग्रन्थाकारे सम्प्रति परिणतं विभाति।

अत्र संक्षेपेण कातन्त्रव्याकरणस्य रचनाप्रयोजनादेः सूत्रपाठ-धातुपाठादीनां च संक्षेपेण परिचयः कश्चित् प्रस्तूयते--

कलाप (कातन्त्र)-व्याकरणस्य परिचयः

कलापव्याकरणे शब्दसाधनप्रक्रिया व्याकरणान्तरीयप्रक्रियापेक्षया प्रायेण भिन्नैवावलोक्यते। सा चात्यन्तं संक्षिप्ता सरला चास्ति। लौकिकशब्दसाधनफलकेऽप्यस्मिन् व्याकरणे मतान्तरेण केचन छान्दसा अपि शब्दा अन्वाख्यातास्तेन ग्रन्थकारमते ते लोकप्रयुक्ता अपि मन्तव्याः।

पाणिनिव्याकरणापेक्षयाऽल्पत्वेन व्याकरणस्यास्य 'कातन्त्रम्' इति नाम जातम्। ईषत् तन्त्रं कातन्त्रम्, ईषदर्थे कुशब्दस्य कादेशः "का त्वीषदर्थेऽक्षे" (कात० २।५।२५) इति। अस्यैव संक्षिप्तस्य कातन्त्रव्याकरणस्य कानिचिन्नामान्तराण्यपि सन्ति प्रसिद्धानि, यथा १-आचार्येण शर्ववर्मणा प्रणीतत्वाद् शार्ववर्मिकम्। २-कुमारप्रसादेन प्रवृत्तत्वात्, कुमार्या भारत्या सरस्वत्या सह संबन्धसत्त्वात्, कुमाराणां कृते हितकरत्वाद् वा कौमारम्। ३-कुमारेण स्ववाहनकलापस्य नाम्ना बोधितत्वात् कलापकम्। ४-दुर्गसिंहेन परिष्कृतत्वाद् दौर्गं चेति। तत्र गौडदेशीयाः तिब्बतदेशीयाश्च 'कलाप' नाम्ना व्याकरणमिदं विदन्ति व्यवहरन्ति चापि।

शर्ववर्माचार्यप्रणीतेऽस्मिन् व्याकरणे सन्धि-नामचतुष्टय-आख्यातात्मकास्त्रयोऽध्याया वर्तन्ते । एषामेकोनविंशतिपादेषु पञ्चपञ्चाशदुत्तराष्टशती (८५५) सूत्राणां दृश्यते । तत्र सन्धि-नाम-आख्याताध्यायानामुपस्थापनक्रमविषये कविराजः सुषेणविद्याभूषणो निर्दिशति—

सन्ध्यादिक्रममादाय यत्कलापं विनिर्मितम् ।
मोदकं देहि देवेति वचनं तन्निदर्शनम् ॥

(कलापचन्द्रः—मङ्गलाचरणम्) इति ।

महर्षिवररुचिप्रणीतानि कृत्सूत्राणि दुर्गसिंहेन, कातन्त्रसम्बद्धानि विज्ञायैकत्र योजितानि । उक्तं च कविराजेन—'वररुचिना तृनादिकं पृथगेवोक्तं ततश्च वररुचिशर्ववर्मणोरेकबुद्ध्या दुर्गसिंहेनोक्तमिति' । (कलापचन्द्रः २।१।६८) इति ।

वङ्गीये काश्मीरके च कातन्त्रव्याकरणे सन्ध्यध्याये षष्ठो निपातपादः, काश्मीरके च कातन्त्रव्याकरणे नामचतुष्टयाध्याये सप्तमः स्त्रीप्रत्ययपादोऽपि दृश्यते, सोऽपि च वररुचि-कात्यायनेनैव प्रणीत इत्यभिमतमाचार्याणाम् ।

अत्र व्याकरणे विभक्ति-पद-वर्णानामादिमध्यान्तलोपो दृश्यते । शर्ववर्माचार्येण प्रतिपत्ति-(अर्थ) लाघवं समादृतम्, तेन क्वचिदनपेक्षिता अपि केचन शब्दाः सूत्रेषु प्रयुक्ताः । लोक-प्रामाण्यस्य विशेषेण समादृतत्वाद् अव्यय-उपसर्ग-कारकादिसंज्ञा न व्याख्याताः । किं च वररुचिमहर्षिणा प्रोक्तमत्र विषये—

वाशब्दैश्चापिशब्दैर्वा शब्दानां (सूत्राणाम्) चालनैस्तथा ।
एभिर्येऽत्र न सिध्यन्ति ते साध्या लोकसम्मताः ॥

(कलापचन्द्रः १।१।२३) इति ।

एतदीयवर्णसमाम्नाये 'अ' इत्यादयो द्विपञ्चाशद् वर्णाः पठ्यन्ते । काश्मीरकास्तु एकोन-पञ्चाशद् वर्णानङ्गीकुर्वन्ति । वर्णसमाम्नाये प्लुतवर्णानामपठितत्वादनुपदिष्टशब्देन तेषां बोधः क्रियते । व्याख्यातासु स्वरादिकृत्यान्तासु पञ्चसप्ततिमितसंज्ञास्वेका ऊष्मसंज्ञा निरर्थिका, तदीय-वर्णावबोधार्थं 'शिट्' इति संज्ञान्तरस्य तत्र व्यवहारसत्त्वात् । वर्णादयो द्वात्रिंशत्तु संज्ञा अव्याख्याता एव प्रयुक्ताः । पाणिनीयमेकशेषप्रकरणं युक्त्या निरर्थकं विज्ञापितम् । कार्यिणः कार्यस्य च समानविभक्तिको भिन्नविभक्तिकश्चापि निर्देशः कृतः । तत्र प्रायेण स्थानी प्रथमान्तः, आदेशश्च द्वितीयान्तो दृश्यते । व्याख्याकारैरनेकेऽपाणिनीया अपि काव्यादौ प्रयुक्ताः शब्दा व्याख्यानबलेन साधवो विज्ञापिताः । सूत्रेषु केचन शब्दाः परिभाषाज्ञापनार्थमुपात्ताः ।

साम्प्रतं कलापस्योपलब्धं संस्करणं दुर्गसिंहेन परिष्कृतं प्रतिभाति । वररुचिना कात्याय-नेनाचार्यशर्ववर्मप्रणीतानां सूत्राणां 'दुर्घट' नाम्नी, स्वप्रणीतकृत्सूत्राणां च 'चैत्रकूटी' नाम्नी वृत्तिः प्रणीताऽऽसीद् या साम्प्रतं नोपलभ्यते । नामचतुष्टयाध्यायान्तर्गतं 'समास-तद्धित' इति

प्रकरणद्वयं श्लोकषट्कम् अस्य। काश्मीरका राजस्थानीयाश्चानेके कातन्त्रस्य व्याख्यानग्रन्था बालबोधिन्यादयः शारदाक्षरेषु नागराक्षरेषु च निबद्धा बालानामेव कृते प्रायेणोपयोगिनः सन्ति, तदुद्देश्येनैवाऽऽचार्यैस्तत्तद्ग्रन्थानां प्रणीतत्वात्। शेषांशपूरणाय कातन्त्रपरिशिष्ट-कातन्त्रोत्तरादयो ग्रन्थाः पश्चादाचार्यैर्विरचिताः। अस्य व्याकरणस्य कातन्त्रमन्त्रप्रकाश-कातन्त्रविभ्रमादयः केचिद् ग्रन्था अवश्यं मननीयं वैशिष्ट्यमापादयन्ति।

अत्रेदं विचार्यते

व्याकरणस्य वेदाङ्गत्वाद् वैदिका अपि शब्दा यदा व्याकरणेनैवान्वाख्येया वर्तन्ते न केवलं लौकिका एवेति, कथन्न तर्हि कातन्त्रंव्याकरणे वैदिकाः शब्दा अन्वाख्याताः? इति। वेदेष्वपि बहवो लौकिकाः शब्दाः प्रयुज्यन्ते, अतो लौकिकशब्दानां साधनप्रक्रियां विदन्तो विद्वांसः प्रकृतिप्रत्यय विभागोहनपूर्वकं वैदिकशब्दानामपि ज्ञानं कर्तुं प्रभवन्त्येवेति वैदिकशब्दानां विषये यथा तैर्निर्णयः कृतस्तथैवान्यैरपि जिज्ञासुभिर्विज्ञेय इत्येवमभिप्रेत्य वैदिकशब्दानामनुशासनं न कृतमत्र ग्रन्थे इत्युदीरिते जिज्ञासान्तरमिदमुपस्थाप्यते--वैदिकशब्दानां परिज्ञानं यदि लौकिकज्ञानां सकाशात् कर्तुं शक्यम्, तर्हि लौकिकानामपि शब्दानां तत्सकाशात् सुतरां ज्ञानं कर्तुं शक्यत एव। एवं न काचिदावश्यकता लौकिकप्रयोगसिद्धये शास्त्रारम्भस्येति किमर्थमाचार्येण शर्ववर्मणा शास्त्ररचनायै प्रयासः कृतः? इति। विषयेऽस्मिन् कातन्त्रवृत्तिकारोक्तवचनानुसारेणैतद् वक्तुं शक्यते--

लौकिकशब्दानां बाहुल्यात् तेषां ज्ञानं लक्षणैर्यथा लाघवेन कर्तुं शक्यते न तथा वृद्धोपदेशपरम्परया तेषामुपदेशः संग्रहो वा कर्तुं शक्यते इत्यभिज्ञायाऽऽचार्यो लौकिकान् शब्दाननुशास्ति इति। यथोक्तम्—

वैदिका लौकिकज्ञैश्च ये यथोक्तास्तथैव ते।
निर्णीतार्थास्तु विज्ञेया लोकात्तेषामसंग्रहः॥
(कात० वृ० १।१।२३) इति।

व्याख्याकारैर्लौकिकशब्दज्ञानस्य व्याकरणमेव साधनं नान्यदिति व्याख्यातम्। वैदिकपरम्पराया युगमन्वन्तरादिष्वप्यविच्छिन्नरूपेण प्रवर्तमानत्वात् तेषां वैदिकशब्दानां परिवर्तनं न सम्भाव्यते इति लाघवैकशरणेन आचार्येण सूत्रैर्न कश्चिदुपायो निर्दिष्टस्तत्सिद्धये।

एतत्तु वक्तुं समीचीनं प्रतिभाति यद् ग्रन्थगौरवभयाल्लोके तत्तच्छब्दप्रयोगस्य प्रसिद्धिवशाद् वा ये हि लौकिकाः शब्दा व्याकरणग्रन्थेष्वाचार्यैर्नान्वाख्यातास्तेषां तु ज्ञानं वृद्धोपदेशादेव करणीयमिति। तेन नेदं मन्तव्यम्—सर्वे शब्दा लोकादेव (वृद्धोपदेशादेव) ज्ञातुं शक्यन्ते न किंचित् प्रयोजनं व्याकरणशास्त्रस्येति। कातन्त्रे ये हि शब्दाः प्रदर्शितप्रकारैर्न साधयितुं शक्यन्ते तेषां ज्ञानं वृद्धोपदेशानुसारेणैव करणीयमिति निर्दिदेश तत्र भवान् भगवान् वृत्तिकारो वररुचिः।

(द्र० श्लोकः--'वाशब्दैरित्यादि', पूर्वं पृ० ३)

कलापव्याकरणस्य रचनायाः प्रयोजनम्

उपलब्धकातन्त्रसूत्राणां प्रणेता आचार्यः शर्ववर्मा इति प्रसिद्धिः। यथोक्तं टीकाकारेण—"तत्र भगवत्कुमारप्रणीतसूत्रानन्तरं तदाज्ञयैव श्रीशर्ववर्मणा प्रणीतं सूत्रं कथमनर्थकं भवति" (कात० वृ० टी० १।१।२) इति। श्रीसुपेणविद्याभूषणेनैतद्व्याकरणस्य रचनाया ऐतिहासिकं वृत्तमुपस्थापयतोक्तम्—श्रीशालिवाहनाभिधानः कश्चिद् वसुधाधिपो महिष्या सह सरोवरे जलकीडायां निरतोऽभूत्। तत्र चिरकालं यावत् प्रवर्तितया जलक्रीडयाऽतितरां श्रान्ता विदुषी महिषी श्लिष्टार्थकं किञ्चिदवोचत्—मोदकं देहि देव! इति। अस्य वचनस्य तात्पर्यमासीद् यदहं जलक्रीडयाऽतीव श्रान्ता संजातास्मि, तस्माद् अधुना विरामः करणीयः। अतो हे देव! उदकं मा देहीति। परं राजा आसीद् व्याकरणज्ञानानभिज्ञः, तेन स बहून् मोदकान् राज्ञ्यै तस्मिन्नवसरेऽददात्। A reader on the Sanskrit Grammarians (P. 22)—विवरणानुसारेण 'मोदकं देहि' इति वचनं राज्ञा व्याहृतम्, तदाकर्ण्य विदुषी राज्ञी स्वयमेव मोदकान् राज्ञे समर्पितवती। परं तन्न ऐतिह्यसिद्धमाभाति। विदुषी राज्ञी वसुधाधिपं मूर्खं विज्ञाय तमुपहसितवती। ततो राजा तदसहमानो व्याकरणज्ञानाय मनसि संकल्पितवान्। तस्य संकल्पं झटिति पूरयितुं किं च भूपतिं क्षिप्रं शब्दज्ञाने व्युत्पादयितुं कृतप्रतिज्ञः शर्ववर्माचार्यः कुमारं स्वामिकार्त्तिकेयं तपसाऽऽराध्य ततो व्याकरणमिदमवाप—इति। तदीयं वचनं यथा—

"राजा कश्चिन्महिष्या सह सलिलगतः खेलयन् पाणितोयैः
सिञ्चंस्तां व्याहृतोऽसावतिसलिलतया मोदकं देहि देव!
मूर्खत्वात्तन्न बुद्ध्वा स्वरघटितपदं मोदकस्तेन दत्तो
राज्ञी प्राज्ञी ततः सा नृपतिमपि पतिं मूर्खमेनं जगर्ह॥

पुरा किल [1]श्रीशालिवाहनाभिधानं वसुधाधिपं झटिति व्युत्पादयितुं प्रतिश्रुतवता भगवता शर्ववर्माचार्येण कुमाराभिधानो भगवान् भवानीसुतस्तपसा समाराधितः। स च तदाराधनाधीनतामुपगतः सन् निजव्याकरणज्ञानमाविर्भावयितुं पद्यपादरूपं सूत्रमिदमादिदेश—सिद्ध इत्यादि।"
(कलापचन्द्रः १।१।१) इति।

आचार्यशशिदेवविरचितेऽष्टपरिच्छेदात्मके [2]व्याख्यानप्रक्रियाख्ये लघुग्रन्थेऽस्य रचनाया बहूनि प्रयोजनानि दर्शितानि। तदनुसारमनेकप्रयोजननिष्पत्त्यर्थं व्याकरणमिदं कार्त्तिकेयेन निर्मितम्। अयं भावः—व्याकरणज्ञानाभावाद् मन्दमतयो वेदानामेवाभ्यासे कृतमनोयोगा वैदिकाः, ज्योतिषादिशास्त्रान्तरमननशीला मनीषिणः, द्रव्याद्यैश्वर्यपरिपूरितत्वात् पराक्षेपपरायणाः पण्डितम्मन्याः, आलस्यादिदोषैः स्फूर्तिविहीनाश्च समर्थाः पुरुषाः, लोकयात्रायाः सम्पन्नतायै विविधव्यापारेषु व्यापृतचेतसो लोभाकृष्टमानसा वणिजश्चाल्पीयस्येव समये व्याकरणं विदन्त्वित्येतेषां बहूद्देश्यानामापूरकमिदं स्वामिकार्त्तिकेयेन रचितमिति। तथाहि—

---

१. अत्र 'सातवाहन' इति पाठः साधीयान् मन्यते।

२. सारस्वती सुषमा, व० ३० अं० ३-४ पृ० १-३०; सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

छान्दसाः स्वल्पमतयः शास्त्रान्तररताश्च ये।
ईश्वरा वाच्यनिरतास्तथाऽऽलस्ययुताश्च ये॥
वणिजस्तृष्णादिसंसक्ता लोकयात्रादिषु स्थिताः।
तेषां क्षिप्रं प्रबोधार्थमनेकार्थं कलापकम्॥

(१।१५–१६) इति।

[1]वेबरमहोदयस्याभिमतमिदं यत् प्राकृतभाषाऽभिज्ञानां संस्कृतज्ञानं स्यादित्यासीदस्य व्याकरणस्य रचनायाः प्रयोजनम्।

श्रीपादकृष्णबेलवल्करमहोदयेन वनमालिप्रणीतः कलापव्याकरणोत्पत्तिप्रस्तावाख्य एको ग्रन्थ उद्धृतः, यो हि हस्तलेखरूपेण सुरक्षितः। तत्रास्य व्याकरणस्य परम्परा विस्तरेणोल्लिखिता। स च हस्तलेखो मया न दृष्ट इति तदीयपरम्परायाः स्वरूपमुद्धर्तुं न शक्यते। डॉ० बूलरमहोदयेनापि व्याकरणस्यास्य काचित् परम्परा निर्दिष्टा[2]।

सातवाहन-तद्राज्ञ्योर्जलकेलिविषयकं संवादमुद्धरता कथासरित्सागरकारेण 'मोदकं देहि राजन्' इति वाक्यं स्मर्यते, परं तत्रास्ति किञ्चिदन्तरम्। अन्यत्रापि किञ्चिद् विवृतमस्ति, तद् यथा––आशु व्याकरणज्ञानं यथा स्यात् तथा करणाय भूपतिना सातवाहनेन प्रार्थितः पण्डितः शर्ववर्मा शिवमाराधितवान्, सन्तुष्टेन भगवता श्रीशङ्करेण शर्ववर्ममनोरथपूर्तये कुमारः कार्त्तिकेयः समादिष्टः। कुमारकार्त्तिकेयेन स्वीयव्याकरणस्य सूत्राणि शर्ववर्मणे प्रकाशितानि। कुमारस्य वाहनं मयूर उभयोर्वार्तालापे मध्यस्थ आसीत्, एतस्मादेव हेतोस्तद्व्याकरणस्य 'कलाप' इत्यभिधानं जातम्। भगवतः कुमारस्यानुग्रहेण प्राप्तत्वात् कौमारम् इति नाम्नाऽपि प्रसिद्धम् इदम्।

एकेन वचनेनेदमपि विज्ञायते यत् षडाननेन स्वयमेव मयूरपुच्छे शङ्करादेशमनुसृत्य सूत्राणि लिखितानि, तेनेदं व्याकरणं कलापाभिधानं जातम्––

शङ्करस्य मुखाद् वाणीं श्रुत्वा चैव षडाननः।
लिलेख शिखिनः पुच्छे कलाप इति कथ्यते॥ इति

भगवतः कुमारस्यानुग्रहेण प्राप्तत्वात् कौमारमिति नाम्ना प्रथितमिदम्। वादिपर्वतवज्रेण

---

1. History of Indian Literature, P. 227.
2. The tradition is mentiond in Dr. Buhler's report for 1875–76, and detailed in the कलापव्याकरणोत्पत्तिप्रस्ताव––by a ms. of which is No-50 of notices, second series, by Haraprasad Shastri (See–Systems of Sanskrit grammar, P. 82, F. N. ii).

भावसेनेन तु [1]कुमार्या = सरस्वत्या सहास्य संबन्धो दर्शितस्तेनैव च 'कौमार' नाम जातम् ।

कातन्त्रस्योपलब्धं संस्करणं दुर्गसिंहेन परिष्कृतं प्रतिभाति । माधवीयधातुवृत्ति--क्षीरतरङ्गिणी-दैवादिषु धातुव्याख्यानभूतेषु बहूनि मतानि दुर्ग-दौर्ग इति नामभ्यामुद्धृतानि दृश्यन्ते । सर्वविद्यानिधान-कवीन्द्राचार्यसरस्वतीमहाभागेन स्वीयग्रन्थसूचीपत्रे संस्कृतव्याकरणग्रन्थमध्ये कलापव्याकरणातिरिक्तं दौर्गव्याकरणमप्युल्लिखितम् (द्र०--सं० १४७) । यद्यपि कातन्त्रस्यैवापरं नाम यत् कौमारव्याकरणं तदपि तत्रोद्धृतमिति तत्र तत्तन्नामभिः प्रकाशिता हस्तलिखिता वा ग्रन्थाः समुल्लिखिता इति वक्तुं शक्यते । पञ्जीकारस्त्रिलोचनदासः "तादर्थ्ये" (कात० २।४।२७) इति सूत्रं चन्द्रगोमिप्रणीतं मनुते । इह तु वृत्तिकारेण दुर्गसिंहेन मतान्तरप्रदर्शनार्थमुपस्थापितमिदं सूत्रम् (द्र०--पञ्जी २।४।२७) । एतस्माद् हेतोरुपरि कृतो विचारः प्रामाण्यं भजते ।

साम्प्रतमेतेषु शर्ववर्म-कात्यायनप्रोक्तेषु कातन्त्रसूत्रेषु दुर्गसिंहप्रणीता वृत्तिरुपलभ्यते । सेयं वृत्तिर्वररुचिवृत्तेः शतत्रयवर्षानन्तरं रचिता, एवं चिच्छुवृत्तिरपीति गुरुपदहालदारो[2] विज्ञापयति । चित्सुखाचार्यप्रणीतायाश्चिच्छुवृत्तेः शिष्यहितान्यासनामकं व्याख्यानं काश्मीरकेणोग्रभूतिना कृतम्[3] । ग्रन्थोऽयं शारदाक्षरेषु लिखितः २४६ पत्रात्मकः श्रीनगरस्थसर्वकारीयपुस्तकालये सुरक्षितो दृश्यते । होशियारपुरस्थे विश्वेश्वरानन्द-विश्वबन्धु-वैदिकशोधसंस्थानेऽप्येकस्त्रुटितोऽस्य हस्तलेखो वर्तते, परं स चिच्छुवृत्तेर्व्याख्यानभूतो ग्रन्थ इति न प्रत्येतुं शक्यते । चिच्छुवृत्तेः साम्प्रतमनुपलब्धिवशात्तद्विषये मौनमवलम्ब्यते । उग्रभूतिकृतः शिष्यहितावृत्तिग्रन्थस्तिब्बतीभाषायामनूदितो लभ्यते ।

सम्प्रति वङ्गीयकातन्त्रवाङ्मये सप्तविंशतिः, उत्कलप्रदेशीयकातन्त्रवाङ्मये षट्, काश्मीरककातन्त्रवाङ्मये सप्त, राजस्थानीयकातन्त्रवाङ्मये षोडश ग्रन्था हस्तलिखिता मुद्रिता वा प्राप्ताः सन्ति । तिब्बतीभाषायामनूदिताश्चत्वारो ग्रन्थाः डॉ० A. C. Burnell महोदयेन The Aindra School of Sanskrit Grammarians (P. 59) ग्रन्थे उद्धृताः । वस्तुतस्तिब्बतीभाषायामनूदिता द्वादश ग्रन्था उपलभ्यन्ते ।

---

१. ब्राह्म्या कुमार्या प्रथमं सरस्वत्याऽप्यधिष्ठितम् ।
अर्हम्पदं संस्मरन्त्या तत्कौमारमधीयते ॥
कुमार्या अपि भारत्या अङ्गन्यासेऽप्ययं क्रमः ।
अकारादिहपर्यन्तस्ततः कौमारमित्यदः ॥
(कातन्त्ररूपमाला--ग्रन्थान्ते) ।

२. वाररुचिक वृत्तिर प्राय ३०० वत्सर परे दौर्गवृत्ति एवं काश्मीरे चिच्छुवृत्ति रचित हइयाछे । वर्धमानेर कातन्त्रविस्तरवृत्ति चिच्छुवृत्तिर परवर्ती (व्या० द० इति०, पृ० ३९५) ।

३. कौमारसम्प्रदाये चिच्छुवृत्तिर उपरि काश्मीरक उग्रभूति शिष्यहितान्यास प्रणयन करेन (व्या० द० इति०, पृ० ३९८) ।

दाक्षिणात्यकातन्त्रवाङ्मयेऽपि सन्ति बहवो ग्रन्था उद्धृताः, परं ते तमिल-तेलुगुप्रभृति-लिपिनिबद्धा मया न समधीता इति तत्संख्यावसायो न क्रियते। तमिलभाषाव्याकरणस्य तोल-काप्पियस्य, पालिभाषायाः कच्चायनव्याकरणस्य च संबन्धः कातन्त्रव्याकरणेन सह पर्याप्तं वर्तते (द्र०—तुलनात्मकं किञ्चिद् विवरणम्—The Aindra School of Sanskrit Grammarians, P. 8-10)।

व्याकरणस्यास्य बहूनि मतानि वचनानि; च कलापदीपिका-क्षीरतरङ्गिणी-माधवीय-धातुवृत्ति-पुरुषकार-प्रौढमनोरमा-शब्दरूपकल्पद्रुम-रत्नबोध-दुर्घटवृत्ति-पदचन्द्रिका-मुग्धबोधटीका-व्याख्यानप्रक्रियाग्रन्थेषु स्मृतानि समुपलभ्यन्ते।

एवं संक्षेपेण कातन्त्रव्याकरणस्य परिचयो दर्शितः। अधुनाऽस्मिन् प्रस्तुतग्रन्थे संगृहीतानां विषयाणां क्रमेण परिचयः प्रस्तूयते—

१-२. कातन्त्रसूत्रपाठस्य परिचयः

सातवाहनभूपालो यथाशीघ्रं (षण्मासाभ्यन्तरे) व्याकरणज्ञानमर्जयेदिति धिया प्रणीतस्यास्य व्याकरणस्याध्यायत्रितये ८५४ संख्याकानि, वररुचिप्रणीते कृदध्याये च ५४६ संख्याकानि, एवं योजनया १४०० मितानि सूत्राणि कातन्त्रव्याकरणे सन्ति। चान्द्रव्याकरणस्यैकं दुर्गसिंहसमादृतं "तादर्थ्ये चतुर्थी" इति सूत्रमपि तत्र यदि संयोज्येत तर्हि सम्प्रति १४०१ सूत्राणि भवन्ति। नामचतुष्टयाख्ये द्वियीयाध्याये समासतद्धितपादीयानि सूत्राणि छन्दोबद्धानि पठितानि। वङ्ग-कश्मीर-राजस्थान-दक्षिणदेशीयसंस्करणेष्वेतान्येव सन्ति सूत्राणि। हस्तलेखेषु केषुचित् सन्धिभागे निपाताख्यः षष्ठः पादः, नामचतुष्टयाध्याये स्त्रीप्रत्ययाख्यः सप्तमपादश्चापि प्रस्तुतः। यत्र प्रायेण पाणिनीयव्याकरणानुगतानि सूत्राणि पठितानि। तानि मूलतो बाह्यानि पश्चाद् योजितानि मन्यन्ते। राजादिगणस्य रुचादि-यजादिगणयोरपि सूत्राणि अन्तर्गणसूत्ररूपेणाभिमतानीति तान्युक्तसंख्यातिरिक्तान्येव। अध्याय-पादानुक्रमं सूत्रसंख्या एवं विज्ञेया—

अध्यायः	पादः	सूत्रसंख्या	पाद-नाम
(१) सन्धिः	प्रथमः	२३	संज्ञापादः
,,	द्वितीयः	१८	समानपादः
,,	तृतीयः	०४	ओदन्तपादः
,,	चतुर्थः	१६	वर्गपादः
,,	पञ्चमः	१८	विसर्जनीयपादः
[प्रक्षिप्तः ,,	षष्ठः	८	निपातपादः]

योगः १	५	७९	
(२) नामचतुष्टयम्	प्रथमः	७७	लिङ्गपादः
,,	द्वितीयः	६५	सखिपादः
,,	तृतीयः	६४	युष्मत्पादः
,,	चतुर्थः	५२	कारकपादः
,,	पञ्चमः	२९	समासपादः
,,	षष्ठः	५०	तद्धितपादः
[प्रक्षिप्तः ,,	सप्तमः	६३	स्त्रीप्रत्ययपादः]
योग १	६	३३७	
(३) आख्यातम्	प्रथमः	३४	परस्मैपादः
,,	द्वितीयः	४७	प्रत्ययपादः
,,	तृतीयः	४२	द्विर्वचनपादः
,,	चतुर्थः	९३	सम्प्रसारणपादः
,,	पञ्चमः	४८	गुणपादः
,,	षष्ठः	१०२	अनुषङ्गपादः
,,	सप्तमः	३८	इडागमपादः
,,	अष्टमः	३५	धुट्पादः
योगः १	८	४३९	
(४) कृत्प्रकरणम्	प्रथमः	८४	सिद्धिपादः
,,	द्वितीयः	६६	धातुपादः
,,	तृतीयः	९५	कर्मपादः
,,	चतुर्थः	७२	क्वन्सुपादः
,,	पञ्चमः	११३	उणादिपादः
,,	षष्ठः	११६	धातुसंबन्धपादः
योगः १	६	५४६	
पूर्णयोगः ४	२५	१४०१	

प्रत्येकं पादस्य नामव्यवस्थेयं प्रायेण पादारम्भसूत्रशब्दमधिकृत्य प्रवर्तते। पादारम्भसूत्रेषु क्वचिद् विपर्यासवशात् संबद्धसूत्राभावरूपो भ्रमो जायते। एतस्मादेव हेतोः श्रीपादकृष्णबेलवल्करमहोदयो दुर्गसिंहवृत्तावुणादिसूत्रव्याख्यानाभावं लक्षयित्वा उणादिपाठं प्रक्षिप्तं मनुते।* मया मुद्रितग्रन्थपाठं विविधहस्तलेखस्थसूत्रपाठं च समालोच्यैव सूत्राणां शुद्धपाठो गृहीतः। सूत्रादि-पाठसंबद्धा ये हि हस्तलेखा मया समधीतास्तेषामिह सूची संयोज्यते—

हस्तलेखः	संस्थानाम	लिपिः	संख्या
१. आख्यातटिप्पनम्	ला० द० भा० सं० मन्दिर, अहमदाबाद	देवनागरी	१
२. आख्यातविवेकः	रा० प्रा० वि० प्र०, जयपुर	,,	१
३. उद्द्योतः	पाटन, राजस्थान	,,	१
४. कलापचन्द्रः	रा० प्रा० वि० प्र०, अलवर	,,	१
,,	सरस्वतीभवनम्, वाराणसी	वङ्ग	३
५. कलापटीका	सरस्वतीभवनम्, वाराणसी	वङ्ग	२
६. कलापव्याकरणम्	भुवनेश्वर-उड़ीसा	उत्कल	१
७. कलापसूत्रपाठः	सरस्वतीभवनम्, वाराणसी	वङ्ग	२
८. कलापसूत्रपाठव्याख्या	,, ,,	,,	१
९. कातन्त्रकारकटिप्पणी	रा० प्रा० वि० प्र०, जोधपुर	देवनागरी	१
१०. कातन्त्रकौमुदी	श्रीनगर-कश्मीर	शारदा	१
,,	उज्जैन-मध्यप्रदेश	,,	१
,,	सरस्वतीभवनम्-वाराणसी	वङ्ग	१
११. कातन्त्रक्रोडपत्रसंग्रहः	सरस्वतीभवनम्, वाराणसी	वङ्ग	१
१२. कातन्त्रटिप्पणकम्	अहमदाबाद	देवनागरी	१
१३. कातन्त्रदुर्गवृत्तिः	जोधपुर	देवनागरी	५
,,	उज्जैन	शारदा	१
,,	जयपुर	देवनागरी	४
,,	अलवर	,,	२
,,	बीकानेर	,,	१३
,,	अहमदाबाद	,,	१४
,,	भुवनेश्वर	उत्कल	३

*Another clear case of later interpolations in the Katantra sutrapatha is furnished by the three Sections in rectangular brackets—निपातपाद, स्त्रीप्रत्ययपाद, and उणादिपाद—which are absent in Durgasimha's Commentary but which are regularly found included in the Kashmirian sutrapatha (Systems of Sanskrit grammar, p. 85).

१४. कातन्त्रमन्त्रप्रकाशः	अलवर	देवनागरी	४
१५. कातन्त्रम्	वाराणसी	,,	३
१६. कातन्त्ररूपमाला	वाराणसी	,,	१
१७. कातन्त्रलघुवृत्तिः	होशियारपुर	शारदा	१
,,	श्रीनगर-कश्मीर	,,	१
,,	जम्मू	देवनागरी	४
,,	जोधपुर	,,	१
,,	दिल्ली	,,	२
१८. कातन्त्रवार्त्तिकविस्तरः	अहमदाबाद	देवनागरी	१
१९. कातन्त्रविवरणटीका	वाराणसी	,,	१
२०. कातन्त्रविवरणपञ्जिका	,,	,,	१
२१. कातन्त्रविवरणम्	,,	,,	१
२२. कातन्त्रविस्तरः	भुवनेश्वर	उत्कल	८
,,	वाराणसी	देवनागरी	२
,,	,,	वङ्ग	१
कातन्त्रविस्तरविवरणम्	ए० सो० ऑ० ब०, कलकत्ता	देवनागरी	१
२३. कातन्त्रविस्तरनिगूढार्थप्रकाशिका	भुवनेश्वर	वङ्ग	१
२४. कातन्त्रवृत्तिः	वाराणसी	वङ्ग	९
,,	,,	देवनागरी	२
२५. कातन्त्रवृत्तिटीका	बीकानेर	,,	७
,,	वाराणसी	वङ्ग	२
२६. कातन्त्रवृत्तिपञ्जिका	अलवर	देवनागरी	१
,,	अहमदाबाद	,,	१
,,	उज्जैन	,,	१
,,	भुवनेश्वर	उत्कल	१
,,	वाराणसी	वङ्ग	१०
,,	,,	देवनागरी	३
२९. कातन्त्रवृत्तिपञ्जिका-व्याख्या	वाराणसी	वङ्ग	१
२८. कातन्त्रवृत्तिपञ्जिका-प्रदीपः	जोधपुर	देवनागरी	१
२९. कातन्त्रवृत्तिविवरण-पञ्जिका	जोधपुर	देवनागरी	१
,,	वाराणसी	,,	९
,,	,,	वङ्ग	१

३०. कातन्त्रवृत्तिविवरणम्	वाराणसी	वङ्ग	२
३१. कातन्त्रवृत्तिव्याख्यानम्	अलवर	देवनागरी	१
३२. कातन्त्रव्याकरणम्	जोधपुर	,,	४
,,	बीकानेर	,,	३
३३. कातन्त्रव्याकरण-स्फुटपत्राणि	जोधपुर	,,	१
३४. कातन्त्रं सवृत्तिकम्	वाराणसी	वङ्ग	७
,,	,,	देवनागरी	१
३५. कातन्त्रसूत्रपाठः	अहमदाबाद	वङ्ग	१
३६. कातन्त्रसूत्रम्	वाराणसी	देवनागरी	३
,,	,,	वङ्ग	१०
३७. कातन्त्रसूत्रवृत्तिः	,,	,,	१३
३८. कातन्त्रसूत्रवृत्तिविवरणपञ्जिका	,,	देवनागरी	१
३९. कातन्त्रोत्तरवृत्तिटीका	भुवनेश्वर	उत्कल	२
४०. कातन्त्रोत्तरविद्यानन्दिवृत्तिः	जोधपुर	देवनागरी	३
४१. कालापप्रक्रिया	,,	,,	१
४२. कृदन्तवृत्तिः	बीकानेर	,,	१
,,	अहमदाबाद	,,	१
४३. गोल्हणटीका	जोधपुर	,,	१
४४. चतुष्कवृत्तिटिप्पनकम्	अहमदाबाद	,,	२
४५. त्रिलोचनचन्द्रिका	,,	,,	१
,,	जोधपुर	,,	१
४६. दुर्गपदप्रबोधः	,,	देवनागरी	१
४७. पञ्चसन्धिव्याख्या	जयपुर	,,	१
४८. बालबोधिनी	श्रीनगर	शारदा	१
,,	दिल्ली	,,	१
,,	जम्मू	देवनागरी	१
४९. बालबोधिनीन्यासः	दिल्ली	शारदा	१
,,	श्रीनगर	,,	२
५०. बालबोधिनीवृत्तिः	जम्मू	शारदा	१
,,	जोधपुर	देवनागरी	१
५१. बालावबोधः	बीकानेर	,,	१
५२. बालावबोधटीका	जोधपुर	,,	१
५३. बालावबोधवृत्तिः	अहमदाबाद	,,	३
,,	जोधपुर	,,	५

५४. लघुललितवृत्तिः	जोधपुर	शारदा	१
५५. वर्धमानप्रकाशः	भुवनेश्वर	उत्कल	१
५६. वर्धमानप्रक्रिया	,,	,,	३
५७. वर्धमानप्रक्रियासारः	,,	,,	१
५८. वर्धमानव्याकरणम्	,,	,,	१
५९. वर्धमानसंग्रहः	,,	,,	१
६०. वैयाकरणसिद्धान्ततत्त्वविवेकः	अहमदाबाद	देवनागरी	१
६१. शिष्यहितान्यासः	दिल्ली	शारदा	१
,,	श्रीनगर	,,	१
६२. षट्कारकखण्डनमण्डनम्	जोधपुर	देवनागरी	१
६३. षट्कारकव्याख्यानम्	जयपुर	,,	१
६४. सारस्वतटिप्पणम्	बीकानेर	,,	१
,,	जयपुर	,,	४
६५. सिद्धसूत्रव्याख्या	,,	,,	१
		योगः	२४४

पश्चादधीतानामन्येषां केषांचिद्ग्रस्तलेखानां विवरणं परिशिष्टे निबद्धम् ।

कातन्त्रीयसूत्रज्ञानस्य सौविध्यार्थं वर्णानुक्रमेणापि सूत्रसूची प्रस्तुता वर्तते । तत्र प्रतिसूत्रं तदीयकार्यनिर्देशकस्य पाणिनीयसूत्रस्याध्यायपादसूत्रसंख्याऽपि दर्शिता ।

३-४. कातन्त्रधातुपाठस्य परिचयः

कातन्त्रीयानुशासनसूत्रेषु "दिवादेर्यन्, नुः स्वादेः, स्वराद् रुधादेः परो नशब्दः, तनादेरुः, ना क्र्यादेः" (३।२।३३,३४,३६,३७,३८) इत्यादौ गणनिर्देशादाचार्यशर्ववर्मणैव पूर्वं कातन्त्र-धातुपाठः कृत इति विज्ञायते । तदीयो धातुपाठः श्रीदुर्गसिंहेन परिष्कृतः । एतन्नामनिर्देशेन सूत्रमेकं क्षीरस्वामी स्मरति—"तथा च क्लेश भाषणे इति चान्द्रं सूत्रम्, क्लेश बाधने इति दौर्गम्" (क्षीरत० १।६३७-३८, पृ० ५०, लिबिश-सं०) इति, तेनास्य धातुपाठस्य प्रसिद्धिर्महत्त्वं च प्रतीयते । रमानाथोऽपि दुर्गसिंहस्य धातुपाठकर्तृत्वं निर्दिशति[1] । स्वीयधातुपाठस्य दुर्गसिंहेन व्याख्यानमपि कृतमित्येकेन वचनेनानुमीयते । यथा—"दन्दशनमिह दन्त-(द-) शूक-कर्तृका क्रियाऽभिधीयते इति दुर्गसिंहव्याख्यानाद् दन्दशन इति पाठोऽनुमीयते" (मनोरमा २०) इति । "ह्रस्ववानयमुतोऽयुरु० इत्यत्रास्यापि ग्रहणमिति कात्यायनव्याख्यानात्" (मनोरमा, णु स्तवने धा० ९५२) इति वचनान्महर्षिकात्यायनेनापि कातन्त्रधातुपाठस्य किञ्चिद् व्याख्यानं कृतमिति वक्तुं शक्यते । त्रिलोचनदासेन धातुपारायणाख्यः कश्चिद् ग्रन्थः कातन्त्रधातुपाठस्य व्याख्यानरूपः प्रणीत इति कविराजवचनेन विज्ञायते[2] । रमानाथेनाप्येतत् सूचितम् ।

१. दुर्गसिंहस्त्वमूनेकयोगं कृत्वा वैक्लव्ये पठति नाह्वानरोदनयोः (मनोरमा, धा० ४९९) ।

२. धातुपारायणे तु त्रिलोचनेन खन्नातीति दर्शितम्, तत्र लेखकप्रमाद एवेति (कवि० ३।२।६९) ।

वङ्गलिपिमय उपलब्धः कातन्त्रधातुपाठः कातन्त्रगणमालानाम्ना वङ्गदेशे प्रसिद्धः, स न शार्ववर्मिको न च दुर्गसिंहपरिष्कृतः, न चापि पाणिनीय एव प्रतिभाति। रमानाथशर्मणा कातन्त्रधातुपाठस्य 'मनोरमा'—नाम्नी व्याख्या धातूनां यथायथं निर्धारणाय प्रणीता। ग्रन्थादौ स इत्थं प्रतिजानीते—

प्रायेण धातुवैषम्यात् सर्वेषां घूर्णते शिरः।
या तत्क्रियायै प्रभवेत् सैव वृत्तिर्मनोरमा॥
भूरि सूरिकृता वृत्तिर्भूयसी युक्तयुक्तिका।
निश्चेतुं धातवस्तस्यां न शक्यास्तेन मे श्रमः॥ इति।

एतेनेदमपि ज्ञातुं शक्यते यदनेकैराचार्यैरस्य व्याख्यानं कृतमासीदिति। रमानाथेन व्याख्याते कातन्त्रधातुपाठे प्रायेणाष्टादशशतं (१८००) धातवः पठिता दृश्यन्ते। क्वचित् पाठे दण्डकशैल्यपि[1] समाश्रिता। जुहोत्यादेरदाद्यन्तर्गतत्वान्नवैव गणा इह मन्यन्ते—

१. भ्वादिः। २. अदादिः। ३. दिवादिः। ४. स्वादिः। ५. तुदादिः। ६, रुधादिः। ७. तनादिः। ८. क्र्यादिः। ९. चुरादिः। उक्तं च—

भ्वदिवषुतुदाद्याश्च रुधतन्क्रीचुरादयः।
इमे नव गणा ज्ञेया धातूनां शार्ववर्मिके॥ इति।

एषु नवसु धातुगणेषु एकोनत्रिंशत्संख्याका अन्तर्गणा अपि वर्तन्ते। धातुषु कार्यविशेष-विधानाय विंशतिरनुबन्धा योजिताः—

१. आ। २. इ। ३. इर्। ४. ई। ५. उ। ६. ऊ। ७. ऋ। ८. ल्। ९. ए। १०. ओ। ११. क्। १२. ङ्। १३. ञ्। १४. ञि। १५. ट्। १६. टु। १७. डु। १८. ण्। १९. प्। २०. ष्।

गणप्रदीपनाम्नाऽपि धातुपाठोऽयमुपलभ्यते। अत्र द्युतादि—वृतादि—घटादिप्रभृतयो नवविंशतिरन्तर्गणा अपि पठिताः।

आत्मनेपद-परस्मैपदव्यवस्थाविषये पाणिनिमतमपेक्ष्य शर्ववर्ममतेऽस्ति कश्चिद् विसंवादः। तद् यथा—कर्त्रभिप्राये एव क्रियाफले स्वरितञित्भ्यो धातुभ्य आत्मनेपदं पाणिनिर्निर्दिशति—"स्वरितञितः कर्त्रभिप्राये क्रियाफले" (अ० १।३।७२)। शर्ववर्माचार्यमतेन तु अनुबन्ध-यजादिभ्यो धातुभ्य उभयपदमेव प्रवर्तते—"इन्-ञ्-यजादेरुभयम्" (कात० ३।२।४५)। एतदभिप्रायेणैवेदमुच्यते—

विशेषः पाणिनेरिष्टः सामान्यं शर्ववर्मणः।
सामान्यमनुगृह्णन्ति तत्राचार्यपरम्परा॥ इति।

दुर्गसिंहपरिष्कृतो धातुपाठस्त्रिविष्टपप्रदेशे (तिब्बते) शाक्यपण्डितैः शार्ववर्मिकधातु-पाठनाम्ना कातन्त्रधातुसूत्रनाम्ना वा व्यवह्रियते स्मेति क्षीरतरङ्गिण्यां (पृ० २३२) डॉ० ब्रूणो लिबिशोक्तवचनमनुसृत्य गुरुपदहालदारेण निर्दिष्टम् (द्र०—व्या० द० इति०, पृ० ४०९-टिप्पणी)।

१. कुथि पुथि युथि लुथि हिंसासंक्लेशयोः (भ्वा०,धा० ७)।

परिष्कृतस्य कातन्त्रधातुपाठस्य स्वयमाचार्यदुर्गसिंहेन वृत्तिरपि कृता। तदीयं नाम गणवृत्तिरासीदिति चर्करीतरहस्यवृत्तिवचनाद् विज्ञायते (कारि० ११, १४)। दीर्घवृत्तिमाधारीकृत्य तदीयधातुपाठस्य धातुपारायणाख्यां वृत्तिमाचार्यस्त्रिलोचनदासो विरचितवान् (द्र०—मनोरमा, भ्वा० ६०, १८०, ५२२, ५७३; अदा० ३५; क्र्या० ५०; क० च० ३. २. ३५)।

अन्येऽप्याचार्याः कातन्त्रधातुपाठं व्याख्यातवन्तः, परं तत्र मतान्तरबाहुल्यस्य सत्त्वाद् धातुनिर्णयो न यथायथं कर्तुं शक्यते, तन्निर्णयाय आचार्येण रमानाथेन 'मनोरमा' नाम्नी धातुवृत्तिः प्रणीता। उक्तं च तेन—

प्रायेण धातुवैषम्यात् सर्वेषां घूर्णते शिरः।
या तत्क्रियायै प्रभवेत् सैव वृत्तिर्मनोरमा॥
भूरि सूरिकृता वृत्तिर्भूयसी युक्तयुक्तिका।
निश्चेतुं धातवस्तस्यां न शक्यास्तेन मे श्रमः॥ इति।

अस्याष्टीकायाः पञ्चषा हस्तलेखा जम्मूस्थे रणवीर-अनुसंधानपुस्तकालये, वाराणसीस्थे सरस्वतीभवने च सन्ति सुरक्षिताः। अस्यां टीकायां षट्सप्ततिर्मुख्या विचाराः प्रवर्तिता इति मया कातन्त्रव्याकरणविमर्शाख्ये स्वीये शोधप्रबन्धे दर्शितम् (पृ० १०९–१२२)।

धातुपाठेऽत्र मया सौविध्याय धातूनां गणपाठक्रमातिरिक्ताऽपि वर्णानुक्रमसूची संयोजिता।

धातुसूत्रसंख्या

भ्वादिगणे	६१६	रुधादिगणे	२४
अदादिगणे	०८७	तनादिगणे	०९
दिवादिगणे	१२२	क्र्यादिगणे	५१
स्वादिगणे	०२३	चुरादिगणे	२९९
तुदादिगणे	११६	योगः	१३४७

धातुसंख्या १७६७

अर्थादिभेददर्शनाय एकस्मिन्नेव गणे पठितानां धातूनां ७५ संख्या अत्र यदि योज्येत तर्हि सम्पूर्णयोगः स्याद् धातूनाम्

१७६७ + ७५ = १८४२

हस्तलेखपरिचयः

१. कातन्त्रधातुपाठः	वाराणसी	वङ्ग	२
,, ,,	जोधपुर	देवनागरी	२
,, ,,	जयपुर	,,	१
,, ,,	भुवनेश्वर	उत्कल	१
२. कातन्त्रधातुवृत्तिः	जम्मू	देवनागरी	१
३. धातुकोशः	नागपुर	,,	१
४. धातुमञ्जरी	जयपुर	,,	२
		योगः	१०

५-६ कातन्त्रीयगणपाठस्य परिचयः

गणशब्देन क्रमेण पठितः प्रातिपदिकशब्दसमूहो गृह्यते। तेषां प्रातिपदिकशब्दानां निर्धारणं सूत्रपाठात् पूर्वमेव कर्तुमावश्यकं प्रतिभाति। तत्पाठमन्तरा सूत्रेषु पठितैरादि-प्रभृति-बहुवचनान्त-

शब्दैस्तत्राभीष्टशब्दानामवगमो नान्यैः कर्तुं शक्यते। एतच्च [1]महाभाष्यकारेण [2]प्रदीपकारेण च प्रसङ्गतः समाहितम्।

एतेन यद्यपि साम्प्रतं कातन्त्रगणपाठः पृथङ् नोपलभ्यते, तथापि "स्वस्रादीनां च, त्यदादीनाम विभक्तौ, मुहादीनां वा, बाह्वादेश्च विधीयते" (२।१।६९; ३।२९, ४९; ६।६) इत्यादिसूत्रेष्वादिशब्दस्य पाठादनुमीयते—शर्ववर्माचार्येणावश्यं स्वस्रादयः शब्दा निर्धारिता आसन्निति।

पाणिनीये आदि-प्रभृति-बहुवचनान्तशब्दैर्गणा निर्दिष्टाः। कातन्त्रे तु सर्वे गणा आदि-शब्देनैव निर्दिष्टाः। पचादयः केचिदीदृशोऽपि लिङ्गगणाः (लिङ्गम् = प्रातिपदिकम्) सन्ति, यत्र पठितेभ्यः शब्देभ्यो धातूनपोद्धृत्याजादिविधानं प्रदर्श्यते, तस्मात् ते न धातुगणाः किं तर्हि प्रातिपदिकगणा एव मन्यन्ते इति तेऽपि गणपाठप्रकरणेऽत्र विचारिताः। विंशत्यादि-शतादि-षष्ट्यादय ईदृशोऽपि गणाः सन्ति येषां शब्दपाठमन्तराऽपि केवलमवधेः परिज्ञानेन बोधो भवितुमर्हति। कपिलकादि-शिवादि-हरीतक्यादिगणा व्याख्याकारैः स्मृताः, परं शर्ववर्माचार्येण सूत्रेषु न निर्दिष्टा इति तेऽपि न संगृहीताः।

"अव्ययाच्च" (२।४।४) इत्यत्रैकवचनेन यद्यपि स्वरादयो निपाताश्च शब्दास्तत्राभिमतास्तथापि तेषां कृते यौगिकोऽयं संज्ञाशब्दः प्रयुज्यते—'अव्ययम्' इति। अयं भावः—बहूनां शब्दानां मध्ये आदावेव पठितेन शब्देन कश्चिद् गणो निर्धारयितुं शक्यते। अत्र च 'अव्यय' इति शब्दो न पूर्वं पठ्यते, किं तर्हि स्वरादयो निपाताश्च शब्दा अव्ययशब्देन बोध्यन्ते, तेषामसंख्यत्वात् (यत्र लिङ्गाद्यन्वयो भवितुं नार्हति)। तेन नात्र स गणरूपेण गृहीतः। असंख्यत्वादव्ययशब्दानां वृत्तिकारेण ते न संकलिताः। टीकाकारेण सार्धद्विशतमिताः (२५०) शब्दाः प्रदर्शिताः। "चादियोगे च" (२।३।५) इत्यत्र चादयः पञ्चैव गृह्यन्ते—'च-वा-ह-अह-एव' इति, आदिशब्दस्य व्यवस्थावाचित्वात्। तेन कृत्स्नस्य चादिगणस्य सूत्रे निर्देशाभावात् स न व्याख्यातः।

व्याख्यातेषु एकोनत्रिंशद्गणेषु (२९) यद्यपि सर्वादिगणः सूत्रे साक्षान्न निर्दिष्टस्तथापि तत्पाठमन्तरा तत्र विहितं स्मायादिकार्यं कर्तुं न शक्यते इति तदभीष्टः सर्वादिगणो गृहीतः। कातन्त्रसम्प्रदाये कातन्त्रपरिशिष्टादौ स्वीकृताः प्रादयो गणा नात्र गृहीताः, तेषां परिशिष्टरूपेण स्मरणात्। महर्षिकात्यायनप्रणीतस्य कृद्भागस्य गम्यादयो गणास्तु गृहीता एव, कृद्भागस्य कातन्त्रव्याकरणे मुख्यरूपेण स्वीकारात्।

---

१. अवरादीनां च पुनः सूत्रपाठे ग्रहणमनर्थकम्। किं कारणम्? गणे पठितत्वात् (म० भा० १।१।३३)।

२. अवरपाठात् पूर्वशब्दोऽवरशब्देनोच्यते। तेन पूर्वं गणपाठः पश्चात् सूत्रपाठ इत्यर्थः (म० भा० प्र० १।१।३३)।

गणशब्दसंख्या

१. सर्वादिः	३४	११. विदादिः	४८	२१. धेन्वनड्वहादिः	६९
२. पूर्वादिः	९	१२. नदादिः	१८१	२२. पचादिः	६
३. स्वस्रादिः	८	१३. पूरण्यादिः	१४	२३. नन्द्यादिः	२६
४. अन्यादिः	५	१४. कुञ्चादिः	१६२	२४. ग्रहादिः	१६
५. त्यदादिः	९	१५. अज्यादिः	८२	२५. तदादिः	११
६. यजादिः	८	१६. बाह्वादिः	५५	२६. गम्यादिः	७
७. दृगादिः	८	१७. गवादिः	३९	२७. भिदादिः	२०
८. मुहादिः	५	१८. द्वयादिः	४	२८. भीमादिः	६
९. गर्गादिः	१००	१९. सद्यआदिः	४०	२९. न्यङ्क्वादिः	२२
१०. यस्कादिः	४४	२०. राजादिः	६५		
योगः	२३०	योगः	६९०	योगः	१८३

महायोगः २३० + ६९० + १८३ = ११०३ ।

७-९. कातन्त्रोणादिपरिचयः

उणादिप्रत्ययान्तेषु शब्देषु निपातनादिकार्यं बाहुल्येन क्रियते इति कृदन्तर्भूता अप्युणादिप्रत्ययाः पृथगेव संगृह्यन्ते आचार्यैः । उणादिप्रत्ययैः प्रायेण संज्ञाशब्दा निष्पाद्यन्ते ते च व्युत्पन्ना अव्युत्पन्नाश्च मन्यन्ते । वैयाकरणनिकाये महर्षिशाकटायनेन सर्वे संज्ञाशब्दा व्युत्पन्नाः, महर्षिगार्ग्येण च तत्र केचिदव्युत्पन्ना अपि स्वीक्रियन्ते । कातन्त्रव्याख्यातारो गार्ग्यमतमनुसरन्ति ।

शर्ववर्माचार्येण लाघवायोणादिसूत्राणि न प्रणीतानीति कृत्सूत्राणां वररुचिकात्यायनेन प्रणीतत्वात् प्रतिभाति । कातन्त्रवृत्तिकारेण श्रीदुर्गसिंहेन कतिपयसूत्राणां रचनयोणादिभागः प्रपूरितः इति संभाव्यते । संप्रति तदीयं व्याख्यानमप्युपलभ्यते । डॉ० चिन्तामणिमहोदयैः कन्नडलिप्यात्मके कस्मिंश्चित् प्राचीनहस्तलेखे आधृतानि षट्पादात्मकानि दुर्गसिंहवृत्तियुतान्येकोनचतुःशतसूत्राणि (३९९) प्रकाशितानि । तान्येवात्र संगृहीतानि । वङ्गाक्षरेषु प्रकाशितानि पञ्चपादात्मकानि सप्तषष्ट्युत्तरशतद्वयमितानि (२६७), वाराणसेय–सरस्वती भवनस्थे हस्तलेखे च चतुरध्यायेषु त्रिपञ्चाशदुत्तरशतद्वयमितानि (२५३) सूत्राणि दृश्यन्ते ।

[1]विमलसरस्वतीवचनानुसारेण वररुचिकात्यायनेनोणादिसूत्राणि प्रणीतानीति सम्भावनं प्रामाणिकतां न भजते ।

नमस्कृत्य गिरं (शिवम्) भूरि शब्दसन्तानकारणम् ।
उणादयोऽभिधास्यन्ते बालव्युत्पत्तिहेतवे ॥

इत्युणादिप्रकरणारम्भे दुर्गसिंहोक्तौ कस्यचित् कर्तृनाम्नः स्मरणाभावादभिधानपदोपादानाच्च स्वयं दुर्गसिंहेनोणादिसूत्राणि प्रणीतानीति गुरुपदहालदारविचारः श्रद्धया भजनीयः प्रतिभाति (द्र०–व्या० द० इति०, पृ० ५७०) ।

1. Unadi sutras in various recensions-Introduction, p. xiv.

षट्पादात्मककातन्त्रोणादिसूत्रेषु कुलटा-तस्कर-छात्र-मुखादिकतिपयशब्दसाधने वैशिष्ट्यं स्पष्टमेव लक्ष्यते—"कुले टालेरिलुक् डश्च (५।४७), तसेः करः (६।३), वन्देस्त्रश्छादेशश्च (६।४२), सुखेः को मुखिश्च" (६।६५)। एतूणादिसूत्रेषु उण्—अल्प्रभृतयः २५५ प्रत्ययाः, १२ अनुबन्धाः, २५ लिङ्गगणाः, ११ सौत्रधातवश्च प्रयुक्ता दृश्यन्ते । अन्ते प्रतिप्रत्ययमेकैकमुदाहरणमपि पृथक् सूच्यां मया प्रदर्शितम् ।

अस्य द्वौ, हस्तलेखौ नागराक्षरमयौ अहमदाबादस्थे ला० द० भा० सं० विद्यामन्दिरेऽपि सुरक्षितौ ।

उणादिसूत्रसंख्या—३९९

उणादिप्रत्ययसंख्या—२५५

१० कातन्त्रीयलिङ्गानुशासनस्य परिचयः

लिङ्ग्यते ज्ञायते पुंस्त्वादिधर्मोऽनेनेति लिङ्गम् । शब्दविशेषवाच्यत्वे सति शब्दसंस्कारानुगुणधर्मविशेषः स्त्रीत्वं पुंस्त्वं नपुंसकत्वं वेत्यर्थः । प्रतिशब्दं स्त्रीत्वादिलिङ्गस्य नान्तरीयकः संबन्धः, अतः शब्दानुशासनस्यैकोऽवयव एव लिङ्गानुशासनमङ्गीक्रियते आचार्यैः । लिङ्गस्य साहाय्येनार्थनिर्धारणमपि शिष्टैः क्रियते । तदुक्तम्—

[1]अर्थात् प्रकरणाल्लिङ्गादौचित्यादेशकालतः ।
शब्दार्थास्तु विभज्यन्ते न रूपादेव केवलात् ॥

(कवि०, कृत्प्रक०-मङ्गलाचरणम्) इति ।

एतेन 'मित्रो भाति' इत्यादौ पुंस्त्वविशिष्टस्य मित्रशब्दस्य प्रयोगात् सूर्य एव गृह्यते, न तु सुहृदिति, सुहृदर्थे मित्रशब्दस्य नपुंसकत्वात् । "[2]संस्त्याने स्त्यायतेर्ड्ट् स्त्री सूतेः सप् प्रसवे पुमान्" (म० भा० ४।१।३) इत्यादिलिङ्गलक्षणस्य पदार्थेषु कात्स्न्र्येन प्रवृत्तिर्न जायते इत्यभिप्रेत्य महाभाष्यकारेण लिङ्गस्य विवक्षाधीनत्वमुक्तम् (द्र०-म० भा० ४।१।३)। अर्थात् स्त्रीपुंनपुंसकानि लोकलिङ्गानुशासनगम्यानि भवन्ति । लोकेभ्यः शास्त्रकृद्भ्यो लिङ्गानुशासनेभ्यश्च विज्ञेयानीत्यर्थः ।

कातन्त्रीयं लिङ्गानुशासनं दुर्गसिंहेन प्रणीतमिति त्रिलोचनदासेन श्वशुरशब्दस्य लिङ्गविचारप्रसङ्गे उपस्थापितेनैकेन वचनेन संकेतितम् (द्र०-पञ्जी ३।६।५५)। गुरुपदहालदारेणापि कातन्त्रीयलिङ्गानुशासनस्य दुर्गसिंहकर्तृत्वमुक्तम्, तेन काश्मीरकग्रन्थेषु एतद्ग्रन्थोल्लेखो निर्दिष्टः (व्या० द० इति०, पृ० ४२६-२७)। मया तु बीकानेरस्थे अनूपसंस्कृतहस्तलेखसंग्रहालये, अहमदाबादस्थे लालभाई-दलपतलाई-भारतीयसंस्कृतिविद्यामन्दिरे चास्य ग्रन्थस्य हस्तलेखयोः षडशीतिरेव (८६) कारिका दृष्टाः, न तु तत्र व्याख्यानं किञ्चिद् वर्तते । पुण्यपत्तनस्थडक्कनकालेजादयं ग्रन्थो दुर्गसिंहवृत्तियुतः१९५२तमे यीशुवर्षे प्रकाशितः । तत्र प्रायेण पञ्चदशशतं(१५००)

---

१. वाक्यात् प्रकरणादर्थाद् औचित्याद् देशकालतः ।
शब्दार्थाः प्रविभज्यन्ते न रूपादेव केवलात् ॥ (वा० प० २।३१४)

२. द्र०-वा० प० ३।१४।१७१-१७३ ।

शब्दा व्याख्याता दृश्यन्ते । मङ्गलानन्तरमाचार्येण श्रीदुर्गसिंहेन ग्रन्थस्य प्रयोजनं विषयश्च प्रोक्तस्तत्र लोकाद् येषां शब्दानां लिङ्गानि स्पष्टं ज्ञायन्ते, ततो भिन्ना एव शब्दा अत्र आर्याच्छन्दोभिर्व्याख्यापथमानीताः । तथाहि—

स्त्रीपुंनपुंसकानि स्वार्थे सिद्धानि लोकतो यानि ।
तानि त्यक्त्वाऽऽर्याभिः क्रमशो वक्ष्येऽवशिष्टानि ॥ इति ।

ग्रन्थेऽस्मिन् क्वचिद् व्याडिप्रभृतीनामाचार्याणामभिमतानि दर्शितानि । त्र्यशीतिकारिकासु (८३) प्रायेण पञ्चदशशतमितशब्दानां (१५००) लिङ्गानि निरूप्य शब्दानामनन्तत्वान्न साकल्येन कार्यमिदं कर्तुं शक्यते इत्यत्र बालानां प्रबोधार्थं केचिच्छब्दा निदर्शनरूपेणोपन्यस्ता इत्यन्ते तेनोक्तम्—

आनन्त्यादिह शब्दानां लिङ्गानामप्यनन्तता ।
सुवर्णैर्घटितं किञ्चिद् बालानां मुखमण्डनम् ॥ इति ।

ग्रन्थकर्तुर्नामपरिचयोऽप्यन्ते प्रस्तुतो वर्तते । यथा—

दुर्गसिंहोऽथ दुर्गात्मा दुर्गो दुर्गप इत्यपि ।
यस्य नामानि तेनेदं चक्रे लिङ्गानुशासनम् ॥ इति ।

ग्रन्थस्यास्य लिङ्गवृत्तिरिति नामान्तरमप्यभिधीयते ।

लिङ्गानुशासनकारिकासंख्या—८६
कारिकाप्रयुक्तशब्दसंख्या—प्रायेण १५००

हस्तलेखाः

कातन्त्रलिङ्गानुशासनम्	बीकानेर	देवनागरी	१
,,	अहमदाबाद	,,	१
,,	उज्जैन	,,	१
		योगः	३

११-१२. कातन्त्रपरिशिष्टस्य परिचयः

शर्ववर्माचार्यो लाघवोद्देश्येन येषां शब्दानां साधुत्वाख्यानाय नियमान्नाङ्गीकृतवान्, परं दुर्गसिंहो वृत्तौ टीकायां च 'च-वा-तु-अपि' शब्दानां व्याख्यानबलेन शब्दांस्तान् कथमपि निष्पादितवान्, तेषां तदितरेषां चापि शब्दानां साधनाय श्रीश्रीपतिदत्तेन सवृत्तिकानि सूत्राण्युपस्थाप्य तत्पूर्तिः कृता । स च ग्रन्थादावित्थं प्रतिजानीते—

संसारतिमिरमिहिरं महेशमजमक्षरं हरिं नत्वा ।
विविधमुनितन्त्रदृष्टं ब्रूमः कातन्त्रपरिशिष्टम् ॥ इति ।

अत्र परिशिष्टप्रबोधकारस्तर्काचार्यः श्रीगोपीनाथो व्याचष्टे—"कातन्त्रस्य शर्ववर्मोक्तसूत्रस्य परिशिष्टं परिशिष्यते अवशिष्यते यद् वृद्धचागमादिलक्षणं कार्यं तत्परिशिष्टं शर्ववर्मणाऽनुक्तं वयं ब्रूम इत्यर्थः" इति ।

इदं कातन्त्रपरिशिष्टं द्वन्द्वसमासान्तमेवोपलभ्यते। अग्रिमप्रकरणेष्वपि सूत्राणि प्रणीतानि न वेति प्रमाणाभावाद् वक्तुं न शक्यते। केचिद् मन्यन्ते समासप्रकरणान्तं यावद् ग्रन्थे निर्मिते श्रीपतिः पञ्चत्वमापन्नस्तेनाग्रिमो ग्रन्थो न प्रणीत इति। एतच्च विज्ञापितं सम्पादकेन श्रीगुरुनाथशर्मणा। ग्रन्थस्यास्य सन्धिप्रकरणे द्विचत्वारिंशदुत्तरैकशतम् (१४२), नामप्रकरणे एकाधिकशतम् (१०१), कारकप्रकरणे द्वादशाधिकैकशतम् (११२), षत्वप्रकरणे एकपञ्चाशत् (५१), णत्वप्रकरणे सप्तत्रिंशत् (३७); स्त्रीत्वप्रकरणे पञ्चाधिकैकशतम् (१०५), समासप्रकरणे द्व्यशीत्युत्तरैकशतम् (१८२) सूत्राणि वर्तन्ते। एवमत्र त्रिंशदुत्तरसप्तशतं (७३०) सूत्राणि पठितानि।

एषु सूत्रेषु श्रीपतिदत्त–गुरुनाथाभ्यामितरैरपि कैश्चिदाचार्यैर्वृत्तिः कृताऽऽसीदिति कातन्त्रपरिशिष्टप्रबोधोद्धृतैराचार्यान्तराभिमतप्रदर्शकैर्वचनैर्विज्ञायते। तद् यथा—

"अत्र केचित् सस्वरनिर्देश एवायं प्रकृते यद्यपि तद्धितेऽकारो लुप्तस्तथापि भूतपूर्वगतिमाश्रित्य कर्तव्यमिति वदन्ति, तन्न। वचनस्य केवलघञन्ते ईरशब्दे चरितार्थत्वाद् भूतपूर्वगत्याश्रयणे बीजाभावात्" (कात० परि० प्र०, सन्धिप्र० २) इति।

कातन्त्रपरिशिष्टकारस्य श्रीश्रीपतिदत्तस्य ग्रन्थरचनासन्दर्भे श्रूयते— कलापतन्त्रविदुरस्य दुर्गसिंहस्य पार्श्वमुपेत्याध्ययनार्थं श्रीपतिना परमाग्रहः कृतः, परं ब्राह्मणेतरं विज्ञाय दुर्गसिंहेन स प्रत्याख्यातः। गुरुभक्तः श्रीश्रीपतिर्दुर्गसिंहस्य मृण्मयीं प्रतिकृतिं विधाय रहसि प्रत्यहं तां प्रपूजयन्नधीते स्म। अधिगतकलापतन्त्रार्थेन तेनैतद्विषये दुर्गसिंहो विज्ञापितः, परमप्रीतो दुर्गसिंहस्तमुक्तवान्– स्वीयग्रन्थे ममाभिमतस्य खण्डनं त्वया न कार्यम्, नो चेद् व्याघ्रस्त्वां भक्षयिष्यतीति। श्रीपतिदत्तेनैकत्र 'इति दुर्गमतं निरस्तम्' इति लिखितम्, तेन स व्याघ्रभोजनं जात इति। परं श्रीपतिदत्तो ब्राह्मण आसीदिति ये मन्वते तन्मते कश्मलैषा किंवदन्ती (द्र०–कात० परि०, भूमिका, पृ० २)।

श्रीविद्यासागरेणास्य परिशिष्टसूत्रस्य व्याख्यानं कृतम्, यस्य कारकप्रकरणमंशत उपलभ्यते स एवायं विद्यासागरः, येन कातन्त्रप्रदीपो रचित इति तदुद्धृतवचनेनैव विज्ञायते (द्र०-पञ्जी १।२।१२)।

मया अधीता अस्य हस्तलेखाः

कातन्त्रपरिशिष्टम्	सरस्वतीभवनम्, वाराणसी	वङ्गलिपिः	५
,,	राजस्थानप्राच्यविद्या-प्रतिष्ठानम्, अलवर	देवनागरी लिपिः	२
		योगः	७

१३-१४ कातन्त्रच्छन्दःप्रक्रियायाः परिचयः

वैदिकशब्दानामल्पत्वात् तत्प्रक्रियाया अविकृतरूपेणाद्यावधि प्रवर्तमानत्वाच्च शर्ववर्माचार्यण

तत्साधनार्थं प्रयासो न विहित इति कातन्त्रवृत्तिटीकाकारेण ग्रन्थादौ प्रदर्शितम्। तथापि केचिदाचार्याश्छान्दसान् कांश्चित् प्रयोगान् भाषायामपि प्रयोज्यान् मन्यन्ते, तत्रोदाहरन्ति च—

प्रप्रपूज्य महादेवं संसंयम्य मनः सदा।
उपोपहाय संसर्गमुदुद्गतः स तापसः॥ इति।

एतदेवाभिलक्ष्य श्रीचन्द्रकान्ततर्कालङ्कारेण वङ्गप्रदेशीयेन 'कातन्त्रच्छन्दःप्रक्रिया' संकलिता, तत्र च तदीया वृत्तिरपि दृश्यते। श्रीचन्द्रकान्तस्य तद्ग्रन्थकर्तृत्वं नास्तीत्यभिज्ञा वदन्ति। अस्तु, मया जिज्ञासाप्रशमनार्थमिह तदीयसूत्राणि संगृहीतानि ग्रन्थानुक्रमेण वर्णानुक्रमेण चापि।

छन्दःसूत्रसंख्या ५२१

—०—

१५-१९. दुर्गवृत्त्यादिग्रन्थेषु स्मृतानां न्यायवचनानां परिचयः

प्रतिव्याकरणमाचार्यैः शास्त्रीयप्रक्रियायाः संगतिं प्रदर्शयितुं कानिचिन्नियमवचनानि स्वीक्रियन्ते, तानि च परिभाषाशब्देन व्यवह्रियन्ते। विधिसूत्राणां पूर्वत्र परत्र च यत् सूत्रवचनं प्रवर्तते तदित्यर्थः। उच्यते चापि—"भाष्यन्ते परितो यस्मात् परिभाषास्ततः स्मृताः"। परितः सर्वतो भाष्यन्तेऽर्था अनयेति परिभाषा। तत्र कानिचिद् वचनानि शास्त्रव्यवहारमनुसरन्ति, कानिचिल्लोकव्यवहारमपि, लोकवच्छास्त्रेऽपि व्यवहारस्य दर्शनात्। शास्त्रे लौकिकी विवक्षा समाद्रियते। न हि कोऽपि शिष्टः शास्त्रव्यवहारे लौकिकीं विवक्षामतिक्रम्य प्रवर्तते।

शास्त्रीयाः परिभाषा द्विविधाः—लिङ्गवत्यो विध्यङ्गशेषभूताश्च। विधीनां नित्यप्रवृत्तौ सत्यां क्वचिद् येन नियम्यते स नियमः, विधीनां पाक्षिकप्रवृत्तौ सत्यां यया नियम्यते सा परिभाषेति नियमपरिभाषयोर्भेदः क्रियते आचार्यैः, तेन पृथक् परिभाषा स्थाप्यते। कैश्चित् परिभाषादिसूत्रैः कानिचिद् वचनानि ज्ञाप्यन्ते, तान्यपि प्रायेण सूत्रवत् प्रमाणानि भवन्ति। वृत्तिकारादिभिर्यथावश्यकं यन्न्यायवचनं वचनतः समाद्रियते तद् वाचनिकपरिभाषाशब्देनोच्यते।

यानि न्यायसिद्धानि वचनानि तानि लौकिक्यः परिभाषा इति विज्ञेयम्। कातन्त्रसम्प्रदाये चतुरध्यायानां 'सन्धि-नाम-आख्यात-कृत्' इत्येतेषां सूत्रपाठे कानिचित् परिभाषासूत्राणि दृश्यन्ते। सूत्रैर्ज्ञापिता अस्मिन् व्याकरणेऽपेक्षिताश्च काश्चित् परिभाषा दुर्गसिंहेन भावशर्मणा च व्याख्याताः। दुर्गसिंहेन पञ्चषष्टिः (६५), भावशर्मणा च द्वापष्टिः (६२) व्याख्याताः परिभाषाः श्रीकाशीनाथ-अभ्यङ्करसम्पादिते परिभाषासंग्रहाख्ये ग्रन्थे प्रकाशिता दृश्यन्ते।

कातन्त्रवृत्त्यादिग्रन्थेषु तत्तत्कार्यविधानाय स्मृताः पञ्चनवतिः (९५) परिभाषा दृश्यन्ते, ताश्चात्र वर्णानुक्रमेण संगृहीताः सन्ति।

कवीन्दु-जयदेवेन पञ्चपञ्चाशत्परिभाषाणां (५५) व्याख्यानाय संकल्पः कृत आसीत्। प्रतापरुद्रीयनगरस्य यात्राप्रसङ्गे एताः परिभाषा विचारिता इति उत्कलाक्षरलिखितहस्तलेखान्ते निर्दिष्टम्।

भावमिश्रेण व्याख्यातासु परिभाषासु काश्चित् परिभाषा दुर्गसिंहव्याख्यातपरिभाषाभ्यो भिन्ना सन्ति, एवं काश्चिद् दुर्गसिंहव्याख्याताः परिभाषा भावमिश्रव्याख्यातपरिभाषाभ्यो भिन्नाः । परिभाषासंग्रहे कातन्त्रपरिभाषासूत्रनाम्ना सप्तषष्टिः (६७) परिभाषासूत्राणि एकोनत्रिंशद् (२९) बलाबलसूत्राणि, कालापपरिभाषासूत्रनाम्नाऽष्टादशोत्तरशतमितानि (११८) च सूत्राणि प्रकाशितानि सन्ति ।

दुर्गसिंहकृतायाः परिभाषावृत्तेष्टीका मदननामकेन केनचिद् विदुषा लिखिता, यत्र द्विषष्टिमितानामेव (६२) परिभाषाणां चर्चा दृश्यते ।

हस्तलेखाः

१. कातन्त्रविस्तरपरिभाषा-टीका	भुवनेश्वर	उत्कल	१
२. कातन्त्रवृत्तिपरिभाषाभाष्यम्	अहमदाबाद	देवनागरी	१
३. परिभाषाशिक्षासूत्राणि	,,	,,	१
		योगः	३

२०. कातन्त्रविभ्रमस्य परिचयः

व्याकरणस्य लोकव्यवहाराधीनत्वात् काव्यशास्त्रादौ प्रयुक्तानां कतिपयशब्दानां साधनार्थं केनचिदाचार्येण कातन्त्रसम्प्रदाये मूलादतिरिक्तानि कानिचित् सूत्राणि प्रणीतानि, यानि साम्प्रतं नोपलभ्यन्ते । एतेषां सूत्राणां पूर्वं व्याख्यानं क्षेमेन्द्रेण कृतमासीत् । अस्य व्याख्यानस्य च टीका मण्डननामकेन केनचिदाचार्येण लिखिता ।

कातन्त्रसम्प्रदायघटकेन केनचिदाचार्येण विभ्रमसूत्रैर्मूलसूत्रैश्च प्रयत्नेन साधिताः प्रायेण सार्धशतमिताः (१५०) शब्दाः प्रश्नोत्तररूपेणैकविंशतिश्लोकेषूपनिबद्धाः । तत्र अवचूरिनामकस्य व्याख्यानस्य प्रणेता न ज्ञायते । अवचूरिकृता प्रसङ्गादन्येऽपि कतिपये शब्दाः संसाधिता इति चारित्रसिंहवचनादवगन्तुं शक्यते ।

अवचूरिटीकामाश्रित्य 'अवचूर्णि' नाम्नी टीका चारित्रसिंहेन (वि० सं० १६२५), नीलकण्ठतनयेन गोपालाचार्येण च (सं० १७६३) प्रणीता हस्तलेखेषु दृश्यते । चारित्रसिंह-विरचिता टीका इन्दौर-नगरात् १९८४ तमे वैक्रमवत्सरे प्रकाशिताऽपि समुपलभ्यते । चारित्र-सिंहो जैनमतानुयायी आसीत् ।

आचार्यद्वयेन कृतमिदं व्याख्यानं सारस्वतव्याकरणसूत्राण्यनुसरति । व्याख्याकारेण चारित्रसिंहेन स्वीये व्याख्याने प्रसङ्गतोऽन्येऽपि कतिपये शब्दाः साधिताः सन्ति । टीकाकारैः प्रसङ्गत उपन्यस्ताः श्लोकाः [ ] एतत्प्रकोष्ठाभ्यन्तरे संकलिताः सन्ति ।

हस्तलेखपरिचयः

कातन्त्रविभ्रमः	जोधपुर	देवनागरी	९
	अहमदाबाद	,,	२
कातन्त्रविभ्रमः	जयपुर	,,	५
,,	बीकानेर	,,	१
कातन्त्रविभ्रमावचूर्णिः	जोधपुर	देवनागरी	९
,,	जयपुर	,,	२
,,	बीकानेर	,,	४
		योगः	३२

२. चर्करीतरहस्यस्य परिचयः

'चेक्रीयित-चर्करीत' इत्येतौ शब्दौ शब्दशास्त्रीयसंज्ञार्थे पूर्वाचार्यैः प्रयुक्ताविति निरुक्तादिवचनैर्विज्ञायते (द्र०, निरु० २।७; ६।९६; म० भा० ४।१।७८; न्या० ७।३।४४; तत्त्वबो०—अदाद्यन्ते)। अनयोर्व्यवहारः पाणिनीये 'यङ्-यङ्लुक्' शब्दाभ्यां कृतः। तत्र चर्करीतान्तशब्दानां लोके प्रयोगः साधुर्न वेति विवदन्ते शाब्दिकाचार्याः। एतदुभयमपि मतं कातन्त्रे समाद्रियते। शर्ववर्माचार्येण चर्करीतकार्यविधायकं किमपि सूत्रं न प्रणीतमिति तदाशयं स्फुटीकुर्वन्नाह टीकाकारः—

"प्रयोगानुसारेण कियन्त एव भाषायां दृष्टा न सर्वे। तथा च बोभवीतीति भट्टिकाव्ये निबद्धम्। अन्ये तु सर्वे एव छान्दसा इति प्रतिपद्यन्ते, तदिह प्रमाणम्" (४।४।४५) इति।

कृत्प्रकरणे कात्यायनेन "पञ्चमोपधाया धुटि चागुणे" (४।१।५५) इत्यत्र यदुपधग्रहणेनेदं विज्ञाप्यते—अन्यत्र प्रकृतिग्रहणे चेक्रीयितग्रहणे चेक्रीयितलुगन्तस्यापि ग्रहणं भवतीति। एतेन कथंचिद् वक्तुं शक्यते—तत्सम्प्रदायेऽप्येतेषां चर्करीतशब्दानां प्रयोगः समाद्रियते इति।

कातन्त्रपरिशिष्टकारेण महामहोपाध्यायेन श्रीश्रीपतिदत्तेनाभ्यासस्य प्रकृतिभावविधानाया सूत्रमुक्तम्—"चर्करीताभ्यासस्य" (स० प्र०, सू० ३३) इति। एतेन 'अरिअर्ति' इत्यादौ यकाराद्यादेशा न प्रवर्तन्ते। तत्र च महाभाष्यकारादीनां नवानामाचार्याणां मतान्युपस्थापयन् स व्याचष्टे—भाषायामपि चर्करीतप्रयोगाः साधवो भवन्तीति (द्र०-कात० परि० वृ०, स्० ३३)। कातन्त्रव्याकरणस्य लोकप्रयुक्तशब्दसाधनफलकत्वादेतन्मतमङ्गीक्रियते, अन्यथा तद्विवादप्रसङ्गो नापद्येत। उच्यते चापि कातन्त्रपरिभाषावृत्तिकृता श्रीदुर्गसिंहेन—"अभिधानाद् भाषायामपि दृश्यते इत्यारम्भः। तथा च भट्टिकाव्ये-बोभवीति न संमोहः" (परि० १२) इत्यादि। कातन्त्रे श्रीपतिदत्तेन समादृतत्वाद् भाषायां चर्करीतप्रयोगाणां श्रीकविकण्ठहारेण तद्व्याख्यानं विंशतिकारिकाभिः कृतं रसवदादिव्याकरणसम्मतम्। तेन ग्रन्थादौ नमस्कारात्मकं मङ्गलमाचरता श्लोकत्रितयेन ग्रन्थारम्भस्य प्रयोजनं स्वीयः परिचयश्चोपस्थापितः। तथाहि—

प्रणंनम्य महादेवं चर्करीतरहस्यकम्।
श्रीकविकण्ठहारोऽहं वावक्मि वदतां वरः॥

परिभाषाटीकायां माधवदासकविचन्द्रभिषजा यत् ।
गुरुगुरुणा चोत्तरपरिशिष्टे यदभिहितमविरुद्धम् ॥
रसवत्-पद्मशब्दानुशासनयुगले चाभिहितं वीक्ष्य ।
तत्सर्वं संक्षेपात् पदानि यावधि चर्करीतानाम् ॥
नो जानाति कलापतन्त्रविदुरो यद् यावदीति स्फुटम् ।
भाषायामिह चर्करीतमखिलं नेयं वरीवृश्यते ॥
भाषायामपि मंमनीति विदितो वक्तव्यवादी तत-
स्तत्सर्वं विवरीवरीमि रसवत्तन्त्रादिभिः संमतम् ॥ इति ।

६५७. समासेऽवश्यमः० सं० ६२
६५८. समृद्ध्यादिष्वव्ययीभावः स० १४१
६५९. समो राजि क्वौ सं० ३७
६६०. सम्प्रदानम् का० ५
६६१. सर्वनाम नाम० २
६६२. सर्वनाम्नः स० ११६
६६३. सर्वनाम्नो हेत्वादिना० का० ७२
६६४. सर्वपश्चात् प्रभृति० स० ८६
६६५. सस्य च नाम० ५२
६६६. सस्य पादपूरणे सं० ४१
६६७. सस्य षो निमित्तात् ष० १
६६८. सहविद्यमानैकजश्च स्त्री० ५५
६६९. सहस्य साकल्ये स० १४३
६७०. सहार्थे च का० १०४
६७१. सामीप्येऽन्वादेः स० १४९
६७२. सिचश्चेक्रीयिते ष० ४३
६७३. सितसयसिवु० ष० ३०
६७४. सिवुसहसुट० ष० ३१
६७५. सुट् परादिरचादौ सं० १११
६७६. सुपि रः० नाम० ४६
६७७. सुः पूजायाम् का० ११०
६७८. सुभोः पदम् नाम० ८

६७९. सुभोर्नोत्तरपदस्य स० ३३
६८०. सुमङ्गलादेश्च स्त्री० ४१
६८१ सुविनिदुर्भ्यः सुपः ष० ३८
६८२. सुषामादिश्च ष० २०
६८३. सूर्याद् दैवते स्त्री० ५७
६८४. सेधतेर्गतौ ष० ४९
६८५. सेनाऽङ्गस्य स० १७३
६८६. सोढश्च ष० ४८
६८७. सो व्यञ्जने नामिभ्यो रः नाम० ४५
६८८. सौ दीर्घः नाम० ४९
६८९. स्तुतौ सत्प्रभृतेः स० ४३
६९०. स्तोकान्तिकदूरार्थ० स० ११
६९१. स्त्रिया पुंवच्च का० ८०
६९२. स्त्रियामी स्त्री० १
६९३. स्त्रीप्रत्ययस्य लुगणादि० नाम० १०१
६९४. स्त्री त्रिचतुरन्तस्य नाम० २१
६९५. स्त्र्यादृतः स्त्री० ९
६९६. स्त्र्यातो वा नाम० ८६
६९७. स्थलादकर्तृके स्त्री० ३६
६९८. स्थासेनिषेधति० ष० २४
६९९. स्फुरिस्फुल्योर्निनिविभ्यः ष० ३५
७००. स्यतिसुवोरभ्यासे ष० ४६
७०१. स्यादिसमासान्तयोः ण० ११
७०२. स्यादौ च सं० ८२
७०३. स्ये च सुजः ष० ४७
७०४. स्वभावसम्पद्० स० १४५
७०५. स्वमज्ञातिधनाख्या नाम० ५
७०६. स्वरजौ ग्वा० सं० ३१
७०७. स्वरात् कृतः ण० २६
७०८. स्वराद्यदन्तम् स० १३१
७०९. स्वराद् रहाभ्या० स० ८९
७१०. स्वस्येरेरिणोः सं० २
७११. स्वाङ्गादकामे० स० ३१
७१२. स्वाङ्गादकृत० स्त्री० ६१
७१३. स्वाङ्गादप्रधानात् स्त्री० ४८
७१४ स्वाम्येऽधिना का० ६८
७१५. स्वायम्भुवम् नाम० ४०
७१६. हनः ण० २०
७१७. हयगवयसुकय० स्त्री० १५
७१८. हललाङ्गलयोरीषायाम् सं० ६७
७१९. हायनाद् वयसि स्त्री० ६
७२०. हिततततयोर्यणि सं० ६५
७२१. हिन्वानिमीनाम् ण० १९
७२२. हृदिस्पृग्दिविस्पृशौ स० २५
७२३. हृदद्युभ्यामेवेन्० स० २९
७२४ हेः प्रतिवचने सं० १०७
७२५. हेतावृणे का० ४१
७२६. हेतौ का० १०३
७२७. हे म-न-य-व-ला० सं० ५६
७२८ हो घि हनः ण० ३२
७२९. ह्रस्वात्तादौ तद्धिते० ष० २२
७३०. ह्रस्वादर्हो व्यञ्जन० सं० ८८

१३. कातन्त्रच्छन्दःप्रक्रियायाः सूत्रपाठः

अथ सन्धौ प्रथमः पादः

छन्दसि प्रोपसमुदां द्विः पादपूरणे बहुलम्[1]। दीर्घस्तुनुघमक्षुकुत्रोरुष्याणामृचि[2]। निपाते नामिनः सौ[3]। निपातस्य च[4]। ऋचि लोपस्त्रेरनादेः[5]। आदेरेमन्नादिषु[6]। आत्मनश्चाऽऽकारे मन्त्रे[7]। अन्यस्मिन्नपि दृश्यते[8]। यवौ प्लुतविकारयोः स्वरे[9]। लोपस्तयोः शाकल्यस्य[10]। आङ्नुनासिकः प्रकृत्या[11]। अन्यत्रापि दृश्यते[12]। एदोतावन्तःपादमत्यवपरे[13]। अयमव्रतावक्रमुरव्यादवद्यादव्रन्त्ववस्युषु च[14]। उरो यजुषि[15]। आपो जुषाणो वृष्णे वर्षिष्ठे[16]। अम्बे अम्बाले अम्बिकेपूर्वे[17]। अङ्गे च[18]। धकवर्गपरे चानुदात्ते[19]। अवपथासश्च[20]। विभाषा गोः[21]। ईषाअक्षादिषु[22]। न नृपतीवादिषु[23]।

सूत्रसंख्या २३

इति सन्धौ प्रथमः पादः।

: ❀ :

अथ सन्धौ द्वितीयः पादः

प्लुतो वाक्यस्यान्त्यस्वरस्य[1]। दूराह्वाने बहुलम्[2]। आमन्त्रिते च[3]। हैहेप्रयोगे तयोरेव[4]। प्रत्यभिवादेऽस्त्रीशूद्रयोः[5]। भोराजन्यविशां वा[6]। गुरोरनन्त्यस्याप्यनृतः पर्यायेण[7]। भर्त्सने द्विरुक्तस्य[8]। पूर्वस्यासूयासम्मतिकोपकुत्सनेष्वन्यतरस्याम्[9]। हेः पृष्टप्रतिवचने[10]। निगृह्यानुयोगे च[11]। साकाङ्क्षस्याङ्गयुक्तस्याऽऽख्यातस्य[12]। आचारभेदाशी:-

प्रैषेषु च[13] । चिदित्युपमार्थे प्रयुज्यमाने प्रतिश्रुतौ च[14] । विचार्यमाणे सर्वेषाम्[15] । प्रश्नाख्यानयोः पदानाम्[16] । ओमारम्भे[17] । बहुलमङ्गीकारे[18] । यज्ञकर्मण्यावह्श्रौषड्वौषड्ब्रूहिप्रेष्याणामादेः[19] । परस्य च प्रेषणेऽग्नीधः[20] । ये यजामहेपरस्य[21] । याज्यानामन्तस्य[22] । पूर्वयोः सन्ध्यक्षरयोरप्रगृह्ययोः प्लुताकारपूर्वाविद्युतावामन्त्रितप्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाच्यान्तेषु पाणिनेः[23] । चतुर्मात्रः परयोः[24] । याज्यान्ते तालव्योष्ठ्ययोः सांख्यायनस्य[25] । प्रणवोऽन्त्यस्वरादेः सामिधेन्यादौ यथोपदिष्टम्[26] । अन्यत्रापि दृश्यते[27] ।

सूत्रसंख्या २३+२७=५०

इति सन्धौ द्वितीयः पादः ।

: ❀ :

अथ सन्धौ तृतीयः पादः

स्वरान्तर्ढढयोर्ळ-ह्ळौ बह्वृचानाम्[1] । स्थमात्स्तुतिस्तुत्यवोरेषु सधः सहस्य[2] । नात्तुः पदान्तात् से बहुलम्[3] । तस्मिन्ननुस्वारस्तस्य छन्दोगानाम्[4] । अन्यत्रापि दृश्यते[5] । अनुस्वारस्यँ रेफोष्मणोः[6] । अनुस्वारपूर्वाः शषसाश्चटतवर्गाणां प्रथमद्वितीययोर्नस्यान्तस्यार्चि[7] । विसृष्टो दीर्घात् स्वरहयवरेषु[8] । स्वतवानः पायौ[9] । तस्मिन्ननुनासिकः पूर्वस्यानुस्वारो वाऽन्तः[10] । अम्नसूधसवसां रो वा[11] । महाव्याहृतेश्च भुवः[12] ।

सूत्रसंख्या ५०+१२=६२

इति सन्धौ तृतीयः पादः ।

: ❀ :

अथ सन्धौ चतुर्थः पादः

सो विसृष्टस्य कपवर्गयोरप्राग्रेडितयोः[1]। पञ्चम्याः पातौ[2]। परौ चोपर्यर्थे[3]। पतिपुत्रपदपृष्ठपारपयस्पोषेषु षष्ठ्याः[4]। इडाया वा[5]। स्याल्लोपो व्यञ्जने[6]। षो व्युपधस्य कपवर्गयोः[7]। द्विर्भावो विश्वजनादिभ्यश्छकारस्य विभाषा[8]। वस्नादीनि यथोपदिष्टम्[9]।

सूत्रसंख्या ६२ + ९ = ७१

इति सन्धौ चतुर्थः पादः।

:❀:

अथ नाम्नि चतुष्टये प्रथमः पादः

षष्ठीयुक्तः पतिरग्निष्टादौ वा[1]। बहुलं लोपो विभक्तीनां पूर्वस्य च दीर्घः[2]। जसश्चादेः[3]। आजादयारियाडियाडेडाड्यायेतः[4]। आसकाराज्जसि[5]। नेतरात्तुः[6]। लोपो दन्त्यस्यातः[7]। भिसैस्[8]। सार्वनामिकमुभयादीनाम्[9]। शसादिषु मांसपृतनासानूनां मांस्पृत्स्नवः[10]। पादहृदयनासिकायकृत्शकृदसृङ्मांसनिशायूषदोषुदकासनानां पद्धृन्नस्यकन्शकन्नसन्मास्निश्यूषन्दोषन्नुदन्नासनः[11]। आसन्नास्यस्य[12]। सम्बुद्धावव्ययाः श्वेतवाः पुरोडा उक्थशाः[13]। ह्रस्वो डलकवतामम्बार्थानामेकेषाम्[14]। ङौ च तस्य भावे[15]। अन्यत्रापि दृश्यते[16]। आचि गुणो नाम्यन्तस्य[17]। इदुत्कार्यं जसादिषु[18]। लोपो नोर्नामिनो नपुंसके[19]। नेश्च पदान्तस्य[20]। ओषधेर्दीर्घोऽप्रथमायाम्[21]। विभाषा नामि नामिनः[22]। तेस्त्रयः[23]। अमि पन्थः पन्थेर्बहुलं न चाऽलोपः[24]। पथि च जसि[25]। आमि च[26]। अन्नस्थ्यादीनाम्[27]। द्विवाचिष्वी[28]। अक्ष्णश्चाक्षिशब्दस्य[29]। पुंवन्नपुंसकस्य[30]। नदीकारात् सेः[31]। अम्शसोश्चादेर्नद्याः[32]। आसोऽम्[33]। भूसुधियोर्यवावियुवौ च स्वरे[34]। बहुलं तन्वादिषु[35]। श्रीग्रामण्योर्नुरामि[36]। धियो बहुलम्[37]। गोः

पादान्ते[३८]। दृक्स्ववस्स्वतवसां सौ[३९]। दीर्घः षपूर्वस्यानो घुटचसम्बुद्धौ[४०]। उषसश्च[४१]। शीर्षन् शिरसः[४२]। स्नोरन्तयोर्लोपो न चालुप्तवत्[४३]। अह्नः सः[४४]। मासुषःस्ववस्स्वतवसां भे दः[४५]। मन्तुवन्सोर्विसृष्टः सम्बुद्धौ[४६]। वनश्च[४७]। अन्यत्रापि दृश्यते[४८]। नेत् पावकादिषु[४९]। युष्मदोऽम् प्रथमाद्विवचनस्य[५०]। मधुषादीनि यथाऽऽम्नातम्[५१]।

सूत्रसंख्या ७१ + ५१ = १२२

इति नाम्नि चतुष्टये प्रथमः पादः।

: ❀ :

अथ नाम्नि चतुष्टये द्वितीयः पादः

व्यत्ययो विभक्तिलिङ्गवचनानाम्[१]। द्यूतव्यवहारयोर्दिवः कर्मणि द्वितीया ब्राह्मणे[२]। तृतीया जुहोतेरन्यतरस्याम्[३]। प्रेष्यब्रुवोर्हविष्यप्रस्थिते षष्ठी देवतासम्प्रदाने[४]। यजेः करणे वा[५]। चतुर्थ्यर्थे[६]। चतुर्थीसप्तम्यौ षष्ठ्यर्थे[७]। पुनर्वसोरेकवचनं नक्षत्रे[८]। विशाखायाश्च[९]।

सूत्रसंख्या १२२ + ९ = १३१

इति नाम्नि चतुष्टये द्वितीयः पादः।

: ❀ :

अथ नाम्नि चतुष्टये तृतीयः पादः

निसः सस्य षस्तपतावपौनःपुन्ये[१]। ततक्षुस्ततक्षतुस्तुरेषु[२]। दुस्स्तरे[३]। नामिनस्तत्तेयुष्मादेशेष्वन्तःपादम्[४]। यजुष्येकेषाम्[५]। ततक्षुसि च[६]। पूर्वपदस्थान्निमित्तात्[७]। स्तुतस्तोमयोश्च[८]। सोर्निपातस्य[९]। सनोतेर्बहुलम्[१०]। ऋतपूतनाभ्यां सहः[११]। णो नस्यावग्रहादृतः संहितायाम्[१२]। नसो धातुस्थान्निमित्तात्[१३]। उरुषुभ्यां च[१४]। पूर्वपदस्थाद् बहुलम्[१५]।

सूत्रसंख्या १३१ + १५ = १४६

इति नाम्नि चतुष्टये तृतीयः पादः।

: ❀ :

अथ नाम्नि चतुष्टये चतुर्थः पादः

पदन्तादा स्त्रियामृचि[1]। बहुव्रीहेरुपधालोपिनोऽनन्तादी[2]। रात्रेरजसि[3]। विभाषा स्यमोः[4]। भोर्नित्यम्[5]। बह्वादिभ्यश्च[6]। दीर्घजिह्वी[7]। आग्नीध्रसाधारणाभ्याम्[8]। केवलादिभ्यश्च[9]। पुंयोगे मुद्गलादानुश्च[10]। रश्च बहुलं नस्य[11]। असितपलिताभ्यां क्नश्च तस्य[12]। ऊङ् कद्रूवादिभ्यः[14]।

सूत्रसंख्या १४६ + १३ = १५९

इति नाम्नि चतुष्टये चतुर्थः पादः।

: ❀ :

अथ नाम्नि चतुष्टये पञ्चमः पादः

वृत्तौ विभक्त्यलोपो ब्राह्मणाच्छंसिप्रभृतिषु[1]। दीर्घो देवताद्वन्द्वे बहुलमुत्तरपदे[2]। आदग्नेर्विष्णौ[3]। न वृद्धावविष्णौ[4]। दिवो द्यावा[5]। दिवस् च पृथिव्याम्[6]। उषासोषसः सर्वत्र[7]। पितरामातरा च द्वन्द्वे[8]। पूर्ववल्लिङ्गं हेमन्तशिशिरयोः[9]। अहोरात्रयोश्च[10]। दीर्घोऽष्टन उत्तरपदे[11]। सुर्ह्रस्वाच्चन्द्रे मन्त्रे[12]। विभाषा काकवौ पथि कोः[13]। समानस्य सोऽमूर्द्धप्रभृत्युदर्केषु[14]। अद्रिर्देवादीनामन्त्यस्वरादेरञ्चतौ[15]। समापं देवयजने[16]। बहुलं सुभोरुक्तं वन्तुविन्वतिषु[17]। न वृषणो वस्वश्वयोः[18]। अयस्मयादीनि यथाऽऽम्नातम्[19]। न ऋतः को बहुव्रीहौ[20]। बहुप्रजाः[21]।

सूत्रसंख्या १५९ + २१ = १८०

इति नाम्नि चतुष्टये पञ्चमः पादः।

: ❀ :

अथ नाम्नि चतुष्टये षष्ठः पादः

कुलालादिभ्योऽण्[1]। वेशन्तहिमवद्भ्यां भवे[2]। सप्तनस्तदस्य परिमाणमिति वर्गे[3]। छन्दसः सोऽस्यादिरिति प्रगाथे[4]। स्वार्थे च[5]। दृष्टे सान्त्यन्त्यस्वरादिलोपश्च बहुलम्[6]। अग्निकलिभ्यामेयण्[7]। गोत्रादकण्[8]। वामदेवाद् यण्[9]। तित्तिर्यादिभ्यः प्रोक्तस्याध्ययनवेदनयोरीयण् छन्दसि[10]। कलाप्यादिभ्योऽण् ब्राह्मणे च[11]। कठादेर्लुक्[12]। छगलिनो णेयिन्[13]। कलापिवैशम्पायनान्तेवासिभ्यो णिन्[14]। चिरन्तनेन ब्राह्मणे[15]। शौनकादिभ्यश्छन्दसि[16]। अनुब्राह्मणादिन्नध्ययनवेदनयोः[17]। कठादेरकण् प्रोक्ते धर्माम्नाययोः[18]। आथर्वणिकादणिदमर्थे लोपश्चेकस्य[19]। छन्दोगादिभ्यो यण्[20]। शन्शच्छतिभ्यो डिन् परिमाणे[21]। वर्षावसन्तहेमन्तेभ्य इकण् शेषे[22]। आविषस्त्यः[23]। अर्हतौ यत्[24]। भवे[25]। नद्या यण्[26]। दूताद् भागकर्मणोः[27]। अपः संस्कृते[28]। सोमादर्हतौ मयडर्थे च[29]। मधोः[30]। वसोः समूहे च[31]। बर्हिषो दत्ते[32]। रक्षोयातुभ्यो हनन्याम्[33]। रेवतीजगतीहविष्याभ्यः प्रशंसने[34]। तद्वानासामित्युपधानमन्त्र-इष्टकासु लुक् च मन्त्वर्थस्य[35]। अश्विमतोऽण्[36]। वयस्यासु मूर्धन्वतो यतो लोपः[37]। असुरादिदमर्थे[38]। मायायामण्[39]। बहुलं वस्वादिभ्यः स्वार्थे[40]। छन्दसोऽक्षरसमूहे[41]। कृते च[42]। इनश्च पूर्वेभ्यः[43]। मासतन्वोरनन्तरार्थे मन्त्वर्थे च[44]। मधोरण् च[45]। अदिद्राः[46]। लुक् च मन्त्वर्थस्य[47]। यदीनावहन्योजसः[48]। भगाच्च वेशोयशःपूर्वात्[49]। तुग्रादिभ्यो भवेऽन्यतरस्याम्[50]। ईयश्चाग्रात्[51]। समुद्राच्च[52]। सङ्घे चाभ्रात्[53]। अमित्रादिभ्यो बहुलम्[54]। सहस्रात् सम्मितमन्त्वर्थयोः[55]। ऋतोरस्य प्राप्ते[56]। ईयो वत्सरान्निर्वृत्तादिषु[57]। संपरिपूर्वादीनश्च[58]। वतिरुपसर्गाद् धात्वर्थे[59]। युष्मदस्मदोर्वन्तुः सादृश्ये[60]। बहुलं मन्त्वर्थाः[61]। रेरवनीवा मन्त्वर्थे[62]। अप्साद् रस्[63]। सूक्तसाम्नोरीयः[64]। स्वार्थे चेत्[65]। सभायाः साधा-

वेयः[६६] । धेयो मित्ररत्नाभ्याम्[६७] । सर्वदेवाभ्यां तातिः[६८] । शमरिष्ट-शिवेभ्यः करोतौ[६९] । भावे च[७०] । ज्येष्ठात् प्रशंसायाम्[७१] । वृकात्ति-श्च[७२] । परिपन्थिपरिपरिणौ पर्य्यवस्थातरि[७३] । हृदय्या अप्सु[७४] । तोरिष्ठेयन्सू लोपश्च तोरतिशायने[७५] । प्रत्नपूर्वविश्वेमेभ्यस्थेवार्थे[७६] । इदमः प्रकारे[७७] । हेतौ च किमः[७८] । तदिदमो हिदा काले[७९] । द्विस्वराद् विकारावयवयोर्मयट्[८०] । न वद्धूबिल्वोकारवद्भ्यः[८१] । त्रादयो बहुलम्[८२] । नान्तादसंख्यादेः संख्यायाः पूरणे थमौ[८३] । ऋत्व्यवास्त्व्य-वास्त्वमाध्व्यः[८४] । हिरण्मयहिरण्मयौ[८५] । पश्चपश्चापश्चाताच्चास्ता-त्यर्थे[८६] । तरांतमामोर्ह्रस्वोऽन्यतरस्याम्[८७] । बहुलं वो मस्य मन्तोः[८८] । नुरादिरनः[८९] । नात्तरतमयोः[९०] । भूरिदाव्नस्तुः[९१] । ईद् रथिनः[९२] । रे रयेर्मन्तौ बहुलम्[९३] । कक्ष्यायायाशब्दस्य संज्ञायामोर्वन्तौ[९४] । सोमादीनां दीर्घः[९५] । इन्द्रियादीनां विनि[९६] । अन्यत्रापि दृश्यते[९७] । ऋजो-ऋतोर इष्ठेमेयःसु बहुलम्[९८] । समासान्तादसन्तादत्[९९] । बहुव्रीहौ नेतुः[१००] । अन्यतोऽपि दृश्यते[१०१] । पदयोर्वृद्धिर्देवताद्वन्द्वे सूक्तहविषोः[१०२] । न दीर्घाद् वरुणस्य[१०३] ।

सूत्रसंख्या १८० + १०३ = २८३

इति नाम्नि चतुष्टये षष्ठः पादः ।

—: ❀ :—

अथ आख्याते प्रथमः पादः

परेऽपि प्रादयो धातोः[१] । व्यवहिताश्च[२] । आविरादयश्च[३] । व्यत्ययो बहुलं त्यादीनाम्[४] । परोक्षा भूते[५] । ह्यस्तन्यद्यतनीपरोक्षाः सर्वकालेष्वन्यतरस्याम्[६] । विध्यादिषु वर्तमाना[७] । उपसंवादाशङ्क-योश्च[८] । सा लेट्[९] । बहुलं सार्वधातुकविकरणौ[१०] । आदिरवर्णो लेटो लोपश्चेतो बहुलम्[११] । वस्मसोः सकारस्य[१२] । अभ्यस्तानामाकारस्य[१३] । ऐराकारस्य[१४] । एकारस्यान्यत्र[१५] । नाम्नः परेच्छायामपि यिन्[१६] ।

दीर्घोऽश्वाघयोर्यिनि बहुलम्[१७]। देवसुम्नयोर्यजुषि काठके[१८]। अन्यत्रापि दृश्यते[१९]। नेत्वमपुत्रादेः[२०]। लोपः कव्यध्वरपृतनानामन्तस्यर्चि बहुलम्[२१]। दुष्टद्रविणवृषरिष्टानां दुरोद्रविणोवृषण्रिषणः[२२]।

सूत्रसंख्या २८३+२२=३०५

इत्याख्याते प्रथमः पादः।

—: ❀ :—

अथाख्याते द्वितीयः पादः

न चवर्गः कृषेश्चेक्रीयिते[१]। रोऽन्तश्चरादेरभ्यासस्य[२]। बहुलं लुक् चेक्रीयितस्य चर्करीतं च धातुः[३]। चेक्रीयितवच्चर्करीतस्य[४]। कर्तरि परस्मैपदम्[५]। ईड् वचनादिरन्यतरस्याम्[६]। अन्यस्मादपि दृश्यते[७]। चवर्गः कृषेरभ्यासस्य[८]। ऋमतोरिरौ च[९]। बोभूतु तेतिक्ते[१०]। नामिनो गुणो बहुलमुपधान्तस्य[११]। सिच् सार्वधातुके कर्तरि[१२]। गुणः सिचि विकरणे[१३]। इट् चादिः[१४]। व्रयादेर्व्यञ्जनान्तादायः[१५]। लोपव्यत्ययौ विकरणस्य[१६]। इरन्तो मसः[१७]। रिर्धातोः[१८]। लोपस्तस्याऽऽत्मने[१९]। आदेरमोऽद्यतन्याः[२०]। रात् सस्य[२१]। द्विर्वचनम्[२२]। इदभ्यासस्य[२३]। विकरणे छादयो यमादेः[२४]।

सूत्रसंख्या ३०५+२४=३२९

इत्याख्याते द्वितीयः पादः।

— :❀ :—

अथ आख्याते तृतीयः पादः

ह्रस्वो मीनातेः[१]। उज्ज्वलितिक्षरितिक्षमितिवमित्यभ्यमितयश्च[२]। अलर्त्यर्लषि[३]। गनीगन्तीति च[४]। हिरगुणः[५]। तस्य लोपः[६]। गुणिनो धिः[७]। श्रुशृणुकृपृवृभ्यश्च[८]। तस्य पञ्चम्यास्तात्तनथना बहुलम्[९]। गुणस्ततनयोः[१०]। ध्वात् ध्वमः[११]। मलोपो यजेरेनमि[१२]। शयामादीनि

यथाऽऽम्नातम्[13] । धिष्वधिषीयौ[14] । स्थादेरण् सप्तम्यामाशिषि[15] । एदन्तस्य[16] । दृशेरगुणः[17] । कृदृमृरुहिभ्योऽणद्यतन्यां वा[18] । गुपेश्चण्[19] । नेलयत्यर्दयत्यूनयतिध्वनयतिभ्यः[20] । लोपो घसादिभ्योऽणादे[21] । ऋदुपधाया ऋच्चणि[22] ।

सूत्रसंख्या ३२९+२२=३५१

इत्याख्याते तृतीयः पादः ।

—: ❀ :—

अथ आख्याते चतुर्थः पादः

बहुलमीड् वचनादिः[1] । गमेर्डा[2] । इडसार्वधातुकस्य[3] । आदिरङ् ह्यस्तन्यादिषु धातोः[4] । अपस्पृधेथां विदामक्रन् पावयांक्रियात्[5] । कनिक्रन्तीति च[6] । अभ्युत्सादयां प्रजनयां रमयां चिकयामकः[7] । नामिन्धेः[8] । इरे रे[9] । ससूव[10] । मर्मृज्य[11] । आनृचुरानृहुश्चिच्युषेतित्याज[12] । हृग्रहोर्हस्य भो बहुलम्[13] । यजिह्वेञोः संप्रसारणम्[14] । चायः की[15] । खिदेरा[16] । लोपस्तनिपतिभसीनामुपधायाः स्वरादावगुणे[17] । घसभसोरन्त्यस्वरादेर्व्यञ्जनादौ[18] । एकारः पचादीनाम्[19] । धात्वादेरटो दीर्घः[20] । एकारः तुजादीनामभ्यासस्य[21] । पञ्चम्यास्तस्यागुणस्य[22] । अतो द्विस्वरस्याऽऽख्यातस्य[23] । अन्यत्रापि दृश्यते[24] ।

सूत्रसंख्या ३५१+२४=३७५

इत्याख्याते चतुर्थः पादः ।

— : ❀ :—

अथ कृत्सु प्रथमः पादः

इत् सदादेरेच्चोपधायाः[1] । कर्मणि वनसनरक्षमथामिः[2] । खन्यखान्यमर्यध्वर्यभाव्यस्ताव्याः[3] । निष्टर्क्यदेवहूयदेवयज्याः[4] । भय्यप्रवय्यास्तर्याः[5] । प्रणीयोन्नीयोच्छिष्यापृच्छचब्रह्मवाद्यप्रतिषीव्याः[6] । उपचाय्य-

पृडं हिरण्ये[७]। इज्जहातेः क्त्वि वा[८]। क्त्वो यप् बहुलम्[९]। यक् चान्तः[१०]। पीत्व्यादिष्वीः[११]। इष्ट्वीनमिति च[१२]। युप्लुवोर्यपि दीर्घ[१३]। कव्यपुरीषपुरीष्येषु वहेर्युट् च[१४]। हव्ये च पादान्ते[१५]। क्विब्बहुलं हन्तेः[१६]। गत्यर्थेभ्यो युरीषदादिषु[१७]। अन्येभ्योऽपि दृश्यते[१८]। विजुषे यजेः[१९]। उर्बहुलमृतः[२०]। यिनन्ताद्युः[२१]। साढ्यै साढ्वा साढा साढः[२२]।

सूत्रसंख्या ३७५ + २२ = ३९७

इति कृत्सु प्रथमः पादः।

—: ❀ :—

अथ कृत्सु द्वितीयः पादः

ह्वरतेर्ह्वनिष्ठायाम्[१]। अपरिह्वृतः[२]। ह्वरितः सोमे[३]। चत्तविकस्त-ग्रसितस्कभितोत्तभितानि[४]। नसत्तनिषत्तानुत्तप्रतूर्त्तमूर्त्तसूर्त्तानि[५]। श्राताः श्रितमाशीराशीर्ताः[६]। वसुधितिवसुधितसुधितद्वर्धितनेमधितानि[७]। सनिंस-सनिवांसम्[८]। सेन्नसेन्कसेनध्यैन्कध्यैन्शध्यैन्तवैन्तवेङ्तवेनस्तुमर्थे[९]। शक्नोतौ णम्कमौ[१०]। प्रयै रोहिष्यै अव्यथिष्यै दृशे विख्ये[११]। ईश्वरे तोसुन्कसुनौ[१२]। इणादिभ्यस्तोसुन् भावलक्षणे[१३]। सृपितृदोः कसुन्[१४]। भावकर्मणोस्तवैकेन्केन्यत्वनः[१५]। अवचक्षे[१६]। विशस्तृशंस्तृशास्तारः[१७]। तरुतृतरूतृवरुतृवरूतारश्च[१८]। जनिता मन्त्रे[१९]। शमिता यज्ञे च[२०]। सनिष्यदत् कनिक्रदत् कनिक्रत् पनीकणत् करिक्रद् भरिभ्रत्[२१]। दविध्वद् दविद्युतद् दविद्योत्[२२]। घनिघ्नदिति च[२३]।

सूत्रसंख्या ३९७ + २३ = ४२०

इति कृत्सु द्वितीयः पादः।

—: ❀ :—

अथ कृत्सु तृतीयः पादः (उणादयः)

उणिनः[१]। भूसूधूभ्रस्जिभ्यो युक्[२]। जृशुभ्यामसानः[३]। शुट् चार्तेः[४]। ऋज्जिवृधिमन्दिसहिभ्योऽसानक्[५]। युधिबुधिदृशिभ्य आनक्[६]। हुच्छें-

इच्छसनोर्लोपश्च[७] । कृषेरनिश्चश्च कस्य[८] । भृणातेः[९] । आङः शुषेः सन्तात्[१०] । वृतेश्च[११] । दृशियजिपचिहर्येभ्योऽतः कर्मणि[१२] । सव्ये स्थो डू[१३] । अच्चेरिसितौ[१४] । भुवः किः[१५] । मनेरुर्धश्चान्तस्य[१६] । कृहनिभ्यां त्नुक्[१७] । सन्वच्च गमेः[१८] । वयुनं प्रज्ञाप्रशस्ययोः[१९] । ऋषेः सरक्[२०] । श्रुदक्षिभ्यामाय्यः[२१] । दिधिषाय्यः[२२] । स्तुवः सेय्यक्[२३] । पर्फरीकादीनि यथाम्नातम्[२४] । वङ्क्यादिभ्यो रिन्[२५] । अर्तेररुः[२६] । प इत्वः[२७] । जनेरित्वनश्च[२८] । तनोतेर्युयतू[२९] । धृञो नसिः[३०] । चषेरालः[३१] । शकेर्वनिप्[३२] । वृतेरिः[३३] । वृद्धिश्च कृषेः[३४] । शकेर्मन्[३५] । हृभृसृस्तृभ्य ईमन्[३६] । मृजनिभ्यामिमन्[३७] । दादिभ्यस्त्रः[३८] । ऋचेर्घसुन् नुश्च धने[३९] । चायतेरसुन् ह्रस्वश्चान्ने[४०] । आप्नोतेरन्यतरस्याम्[४१] । वृङ्शीङ्भ्यां पुश्च रूपस्वाङ्गयोः[४२] । पातेर्जुश्च बले[४३] । अन्वोदकयोस्थुः[४४] । स्कन्देर्धश्च स्वाङ्गे[४५] । भरिभुजिविदिभ्यो विश्वे[४६] । अन्येभ्योऽपि दृश्यते[४७] । भृजेर्घसुन्[४८] । भुवः कसुन्[४९] । हाधावहिभ्यो णसुन्[५०] । दमेरूनस्[५१] ।

सूत्रसंख्या ४२० + ५१==४७१

इति कृत्सु तृतीयः पादः ।

— : ❀ :—

अथ कृत्सु चतुर्थः पादः (कतिचन नैघण्टुकानि पदानि)

नमिगमिभ्यां कन् पृथिव्याम्[१] । क्षेर्डा सुश्चान्यतरस्याम्[२] । रिबदितिनिर्ऋतयः[३] । पूषा[४] । गस्तुः[५] । चन्द्रं हिरण्ये[६] । इपिशोरसुन्[७] । कृशेः क्युः[८] । मरुद्दत्रम्[९] । बृंहेरिस् नलोपश्च कुशान्तरिक्षये[१०] । प्रथेः षिवः संप्रसारणं चान्तरिक्षे[११] । धन्वेः कन्[१२] । स्वयम्भुवः क्विप्[१३] । ह्रस्वश्चाप्नोतेः[१४] । अध्वा[१५] । समदि द्रवेर्डः[१६] । पुषेः करक्[१७] । भवतेः क्विप् पृथिव्यन्तरिक्षयोः[१८] । स्वः पृश्निर्नाको गौर्विष्टब् नभश्चादित्यदिवोः[१९] । अञ्जेस्तुग् रात्रौ[२०] । नमेस्तः कश्चान्तस्य[२१] । मुचि-

शुचिभ्यामिश्च[२२]। शीङ इनो रुर्ह्स्वश्च[२३]। ऊर्णोतेर्मिर्णलोपश्च तमःसघाते[२४]। वसेस्तोसुन्नहनि[२५]। ध्रंसः[२६]। पुरौ भुजेरसुर्मेघपर्वतयोः[२७]। उपात् पदेरिर्लोपश्चोपधाया वाचि[२८]। गमेर्नड्[२९]। ककेरुतिण्[३०]। वेकुरा[३१]। बृबूकसुदके[३२]। बुर्बुरादीनि च[३३]। सर्तेर्नीकः[३४]। स्वरतेस्तीकङ्[३५]। पदेर्व ऐच्चोपधाया अश्वे[३६]। मनेः श्चत्वो दीर्घश्च[३७]। विषेः क्विस्तुश्च कर्मणि[३८]। विशेः क्विप् व्रश्चादेरङ्गुल्याम्[३९]। पातेस्तुरिच्चान्ने[४०]। क्षेर्डुः[४१]। धाञः सिः[४२]। नृम्णादीनि बले[४३]। तवेष्टिषः[४४]। च्युङस्त्नण्[४५]। धृञो नसिः[४६]। श्वात्रादीनि धने[४७]। हन्तेरसुन्नेहश्च क्रोधे[४८]। वृषन्ध्यादीनि यथाऽऽम्नातम्[४९]। व्यत्ययो बहुलं छन्दसि[५०]।

सूत्रसंख्या ४७१ + ५० = ५२१

इति कृत्सु चतुर्थः पादः।

समाप्तश्चन्द्रकान्ततर्कालङ्कारप्रणीतकातन्त्रच्छन्दःप्रक्रियायाः सूत्रपाठः।

—: ❁ :—

१४. वर्णानुक्रमेण कातन्त्रच्छन्दःसूत्रसूची

१.	अक्ष्णश्चाक्षिशब्दस्य	नाम० १।२९
२.	अग्निकलिभ्यामेयण्	नाम० ६।७
३.	अङ्गे च	सन्धि० १।१८
४.	अञ्जेस्तुग् रात्रौ	कृत्० ४।२०
५.	अतो द्विस्वरस्या०	आख्यात० ४।२२
६.	अद्रिर्देवादीनामन्त्य०	नाम० ५।१५
७.	अध्वा	कृत्० ४।१५
८.	अनुब्राह्मणादिन्नध्ययन०	नाम० ६।१७
९.	अनुस्वारपूर्वाः शषसा०	सन्धि० ३।७
१०.	अनुस्वारस्य च	सन्धि० ३।६
११.	अन्तस्थादीनाम्	नाम० १।२७
१२.	अन्नोदयकस्तुः	कृत्० ३।४३
१३.	अन्यतोऽपि दृश्यते	नाम० ६।९८
१४.	अन्यत्रापि दृश्यते	आख्यात० ४।२३
१५.	अन्यत्रापि दृश्यते	नाम० ६।९४
१६.	अन्यत्रापि दृश्यते	सन्धि० ३।५
१७.	अन्यत्रापि दृश्यते	सन्धि० २।२८
१८.	अन्यत्रापि दृश्यते	सन्धि० १।१२
१९.	अन्यत्रापि दृश्यते	नाम० १।४८
२०.	अन्यत्रापि दृश्यते	नाम० १।१६
२१.	अन्यत्रापि दृश्यते	आख्यात० १।१९
२२.	अन्यस्मादपि दृश्यते	आख्यात० २।७
२३.	अन्यस्मिन्नपि दृश्यते	सन्धि० १।८
२४.	अन्येभ्योऽपि दृश्यते	कृत्० १।१८
२५.	अन्येभ्योऽपि दृश्यते	कृत्० ३।४६
२६.	अपः संस्कृते	नाम० ६।२८
२७.	अपरिह्वृतः	कृत्० २।२
२८.	अपस्पृधेथाम्०	आख्यात० ४।४
२९.	अप्साद्रस०	नाम० ६।६०

३०.	अभ्यस्तानामाकारस्य	आख्यात० १।१३
३१.	अभ्युत्सादयांप्रजनया०	आख्यात० ४।६
३२.	अमित्रादिभ्यो बहुलम्	नाम० ६।५१
३३.	अमि पन्थः पन्थे०	नाम० १।२४
३४.	अम्नसूधसवसां रो वा	सन्धि० ३।११
३५.	अम्बे अम्बाले०	सन्धि० १।१७
३६.	अम्शसोश्चादेर्नद्याः	नाम० १।३२
३७.	अयमव्रतावक्रमु०	सन्धि० १।१४
३८.	अयस्मयादीनि यथा०	नाम० ५।१६
३९.	अर्चेरिसितौ	कृत्० ३।१४
४०.	अर्तेररुः	कृत्० ३।२६
४१.	अर्हतौ यत्	नाम० ६।२४
४२.	अलर्त्यर्लृषि	आख्यात० ३।३
४३.	अवचक्षे	कृत्० २।१६
४४.	अवपथासश्च	सन्धि० १।२०
४५.	अश्विमतोऽण्	नाम० ६।३६
४६.	असितपलिताभ्या०	नाम० ४।१२
४७.	असुरादिदमर्थे	नाम० ६।३८
४८.	अहोरात्रयोश्च	नाम० ५।१०
४९.	अह्नः सः	नाम० १।४४
५०.	आग्नीध्रसाधारणीभ्याम्	नाम० ४।८
५१.	आङनुनासिकः प्रकृत्या	सन्धि० १।११
५२	आङः शुषेः सनन्तात्	कृत्० ३।१०
५३.	आचारभेदाशीःप्रैषेषु च	सन्धि० २।१३
५४.	आचि गुणो नाम्य०	नाम० १।१७
५५.	आजादयारिया०	नाम० १।४
५६.	आत्मनश्चाकारे०	सन्धि० १।७
५७.	आथर्वणिकादन्निदमर्थे०	नाम० ६।१६
५८.	आदग्नेर्विष्णौ	नाम० ५।३
५९.	आदिरड् ह्यस्तन्यादिषु०	आख्यात० ४।३
६०.	आदिरवर्णे लेटो०	आख्यात० १।११
६१.	आदेरमोऽद्यतन्याः	आख्यात०२।२०
६२.	आदेरेमन्नादिषु	सन्धि० १।६

६३.	आनृचुरानृहु०	आख्यात० ४।११
६४.	आपो जुषाणो०	सन्धि० १।१६
६५.	आप्नोतेरेरन्य०	कृत्० ३।४०
६६.	आमन्त्रिते च	सन्धि० २।३
६७.	आमि च	नाम० १।२६
६८.	आविमस्त्यः	नाम० ६।२३
६९.	आविरादयश्च	आख्यात० १।३
७०.	आसकाराज्जसि	नाम० १।५
७१.	आसन्नास्यस्य	नाम० १।१२
७२.	आसोऽस्	नाम० १।३३
७३.	इज्जहातेः क्त्वि वा	कृत्० १।८
७४.	इडाया वा	सन्धि० ४।५
७५.	इणादिभ्यस्तोसुन्	कृत्० १।१
७६.	इदभ्यासस्य	आख्यात० २।२३
७७.	इदमः प्रकारे	नाम० ६।७४
७८.	इनश्च पूर्वेभ्यः	नाम० ६।४३
७९.	इन्द्रियादीनां विनि	नाम० ६।९३
८०.	इषिशोरसुन्	कृत्० ४।७
८१.	इरन्तो मसः	आख्यात० २।१७
८२.	इष्ट्वीनमिति च	कृत्० १।१२
८३.	ईट् चादिः	आख्यात० २।१४
८४.	ईड् वचनादिरन्यतरस्याम्	आख्यात० २।६
८५.	ईडसार्वधातुकस्य	आख्यात० ४।२
८६.	ईदुत्कार्यं जसादिषु	नाम० १।१८
८७.	ईद् रथिनः	नाम० ६।८९
८८.	ईयश्चाग्रात्	नाम० ६।४८
८९.	ईयो वत्सरान्निर्वृत्तादिषु	नाम० ६।५४
९०.	ईरे रे	आख्यात० ४।८
९१.	ईश्वरे तोसुन्कसुनौ	कृत्० २।१२
९२.	ईषा अक्षादिषु	सन्धि० १।२२
९३.	उज्ज्वलितिक्षरिति०	आख्यात० ३।२
९४	उणिनः	कृत्० ३।१

९५.	उपचाय्यपृडं हिरण्ये	कृत्० १।७
९६.	उपसंवादाशङ्कयोश्च	आख्यात० १।७
९७.	उपात् पदेरिर्लोप०	कृत्० ४।२८
९८.	उरो यजुषि	सन्धि० १।१५
९९.	उर्बहुलमृतः	कृत्० १।२०
१००.	उषसश्च	नाम० १।४१
१०१.	ऊङ् कद्रवादिभ्यः	नाम० ४।१३
१०२.	ऊर्युभ्यां च	नाम० ३।१४
१०३.	ऊर्णोतेर्मिणलोपश्च	कृत्० ४।२४
१०४.	ऊषासोषसः सर्वत्र	नाम० ५।७
१०५.	ऋचि लोपस्त्रेरनादेः	सन्धि० १।५
१०६.	ऋजो ऋतोर इष्ठे०	नाम० ६।९५
१०७.	ऋज्विवृधिलन्दि०	कृत्० ३।५
१०८.	ऋतपृतनाभ्यां सहः	नाम० ३।११
१०९.	ऋतोरस्य प्राप्ते	नाम० ६।५३
११०.	ऋत्व्यवास्त्व्यवास्त्व०	नाम० ६।८१
१११.	ऋदुपधाया ऋच्चणि	आख्यात० ३।२२
११२.	ऋमतोरिरौ च	आख्यात० २।९
११३.	ऋषेः सरक्	कृत्० ३।२०
११४.	एकारः पचादीनाम्	आख्यात० ४।१८
११५.	एकारस्यान्यत्र	आख्यात० १।१५
११६.	एदन्तस्य	आख्यात० ३।१६
११७.	एदोतावन्तःपाद०	सन्धि० १।१३
११८.	ऐराकारस्य	आख्यात० १।१४
११९.	ओमारम्भे	सन्धि० २।१८
१२०.	ओषधेर्दीर्घो०	नाम० १।२१
१२१.	ककेरुतिन्	कृत्० ४।३०
१२२.	कक्ष्यायायाशब्दस्य०	नाम० ६।९१
१२३.	कठादेरकण् प्रोक्तधर्माम्ना०	नाम० ६।१८
१२४.	कठादेर्लुक् च	नाम० ६।१२
१२५.	कनिक्रन्तीति च	आख्यात० ४।५
१२६.	कर्तरि परस्मैपदम्	आख्यात० २।५

१२७.	कर्मणि वनसनरक्ष०	कृत्० १।२
१२८.	कलापिवैशम्पायनान्ते०	नाम० ६।१४
१२९.	कलाप्यादिभ्योऽण् ब्राह्मणे च	नाम० ६।११
१३०.	कव्यपुरीषपुरीष्येषु०	कृत्० १।१४
१३१.	कुलालादिभ्योऽण्	नाम० ६।१
१३२.	कृते च	नाम० ६।४२
१३३.	कृदृमृरुहिभ्यो०	आख्यात० ३।१८
१३४.	कृशेः क्युः	कृत्० ४।८
१२५.	कृषेरनिश्चश्च कस्य	कृत्० ३।८
१३६.	कृहनिभ्यां त्नुक्	कृत्० ३।१७
१३७.	केवलादिभ्यश्च	नाम० ४।९
१३८.	क्त्वो यप्	कृत्० १।९
१३९	क्रचादेर्व्यञ्जनान्तादायः	आख्यात० २।१५
१४०.	क्विब्बहुलं हन्तेः	कृत्० १।१६
१४१.	क्षेर्डा सुश्चान्यतरस्याम्	कृत्० ४।२
१४२.	क्षेर्डुः	कृत्० ४।४१
१४३.	खन्यखान्यमर्यंध्वर्य०	कृत्० १।३
१४४.	खिदेरा	आख्यात० ४।१५
१४५.	गत्यर्थेभ्यो युरीषदादिषु	कृत्० १।१७
१४६.	गनीगन्तीति च	आख्यात० ३।४
१४७.	गमेर्डा	आख्यात० ४।१-क
१४८.	गमेर्नङ्	कृत्० ४।२९
१४९.	गस्तुः	कृत्० ४।५
१५०.	गुणः सिचि विकरणे	आख्यात० २।१३
१५१.	गुणस्ततनयोः	आख्यात० ३।१०
१५२.	गुणिनो धिः	आख्यात० ३।७
१५३.	गुपेश्चण्	आख्यात० ३।१९
१५४.	गुरोरनन्त्यस्यापनृतः०	सन्धि० २।७
१५५.	गोत्रादकण्	नाम० ६।८
१५६.	गोः पादान्ते	नाम० १।३८
१५७.	घनिघ्नदिति च	कृत्० २।२३
१५८.	घसभसोरन्त्य०	आख्यात० ४।१७

१५९	ङौ च तस्य भावे	नाम० १।१५
१६०.	चतुर्थीसप्तम्यौ षष्ठ्यर्थे	नाम० २।७
१६१.	चतुर्थ्यर्थे	नाम० २।६
१६२.	चतुर्मात्रः परयोः	सन्धि०२।२५
१६३.	चत्तविकस्तग्रसित०	कृत् २।४
१६४.	चन्द्रं हिरण्ये	कृत्० ४।६
१६५.	चवर्गः क्नसेरभ्यासस्य	आख्यात० २।८
१६६	चषेरालः	कृत्० ३।३०
१६७.	चायः की	आख्यात० ४।१४
१६८.	चायतेरसुन्०	कृत्० ३।३६
१६९.	चिदित्युपमार्थे०	सन्धि० २।१४
१७०.	चिरन्तनेन ब्राह्मणे	नाम० ६।१५
१७१.	चेक्रीयितवच्चर्करीतस्य	आख्यात० २।४
१७२.	च्युङस्त्रण्	कृत्० ४।४५
१७३.	छन्दसः सोऽस्यादि०	नाम० ६।४
१७४	छन्दसि प्रोपसमुदां द्वि०	सन्धि० १।१
१७५.	छन्दसोऽक्षरसमूहे	नाम० ६।४१
१७६.	छन्दोगादिभ्योऽण्	नाम० ६।२०
१७७	जनिता मन्त्रे	कृत्० २।१६
१७८.	जसश्चादेः	नाम० १।३
१७९.	जॄशुभ्यामसानः	कृत्०३।३
१८०.	ज्येष्ठात् प्रशंसायाम्	नाम० ६।६८
१८१.	णो नस्यावग्रहा०	नाम० ३।१२
१८२.	ततक्षुसि च	नाम० ३।६
१८३.	ततक्षुस्तुत०	नाम० ३।२
१८४.	तदिदमोर्हि दा काले	नाम० ६।७६
१८५.	तनोतेर्युयतू	कृत्० ३।२८
१८६.	तद्वासासामित्युप०	नाम० ६।३५
१८७.	तरांतमामो ह्रस्वोऽन्यतरस्याम्	नाम० ६।८४
१८८.	तरुतृतरूतृवरुतृवरूतारश्च	कृत्० २।१८
१८९.	तवेष्टिषः	कृत्० ४।४४
१९०.	तस्मिन्ननुनासिक०	सन्धि० ३।१०

[१९१.	अद्रिदाः	नाम० ६।४६
१९२.	इदुत्कार्यं जसादिषु	नाम० १।१८
१९३.	उषासोसषः सर्वत्र	नाम० ५।७
१९४.	छगलिनो णेयिन्	नाम० ६।१३]
१९५.	तस्मिन्ननुस्वार०	सन्धि० ३।४
१९६.	तस्य पञ्चम्यन्तात्	आख्यात० ३।९
१९७.	तस्य लोपः	आख्यात० ३।६
१९८.	तित्तिर्यादिभ्यः प्रोक्त०	नाम० ६।१०
१९९	तुग्रादियो भवेऽन्य०	नाम० ६।४७
२००.	तृतीया जुहोते०	नाम० २।३
२०१.	तेस्त्रयः	नाम० १।२३
२०२.	तोरिष्ठेयस्सु लोपश्च०	नाम० ६।७२
२०३.	त्रादयो बहुलम्	नाम० ६।७९
२०४.	दमेरूनस्	कृत्० ३।५०
२०५.	दविध्वत् दविद्युतद्०	कृत्० २।२२
२०६.	दादिभ्यस्त्रः	कृत्० ३।३७
२०७.	दिधिषाय्यः	कृत्० ३।२२
२०८.	दिवस् च पृथिव्याम्	नाम० ५।६
२०९.	दिवो द्यावा	नाम० ५।५
२१०.	दीर्घः षपूर्वस्यान्ते०	नाम० १।४०
२११.	दीर्घजिह्वी	नाम० ४।७
२१२.	दीर्घस्तुनुघमक्षु०	सन्धि० १।२
२१३.	दीर्घो देवताद्वन्द्वे	नाम० ५।२
२१४.	दीर्घोऽश्वाघयोर्योनि बहुलम्	आख्यात० १।१७
२१५.	दीर्घोऽष्टन उत्तरपदे	नाम० ५।११
२१६.	दुष्टद्रविण-वृष०	आख्यात० १।२२
२१७.	दुसस्तरे	नाम० ३।३
२१८.	दूताद् भावकर्मणोः	नाम० ६।२७
२१९.	दूराह्वाने बहुलम्	सन्धि० २।२
२२०.	दृक्स्ववस्०	नाम० १।३९
२२१.	दृशियजिपचि०	कृत्० ३।१२
२२२.	दृशेरगुणः	आख्यात० ३।१७
२२३.	दृष्टे साम्न्यन्त्यस्वरादि०	नाम० ६।६

२२४.	देवसुम्नयोर्यजुषि काठके	आख्यात० १।१८
२२५.	द्यूतव्यवहारयोर्दिवः	नाम० २।२
२२६.	द्विर्भावो विश्वजनादि०	सन्धि० ४।८
२२७.	द्विर्वचनम्	आख्यात० २।२२
२२८.	द्विवाचिष्वी	नाम० १।२८
२२९.	द्विस्वराद् विकारावयव०	नाम० ६।७७
२३०.	धकवर्गपरे चानुदात्ते	सन्धि० १।१९
२३१.	धन्वेः कन्	कृत्० ४।१२
२३२.	धाञः सिः	कृत्० ४।४२
२३३.	धात्वादेरटो र्दीर्घः	आख्यात० ४।१९
२३४.	धियो बहुलम्	नाम० १।३७
२३५.	धिष्वधिषीयौ	आख्यात० ३।१४
२३६.	धृञो नसिः	कृत्० ३।२९
२३७.	धृतेनसिः	कृत्० ४।४६
२३८.	धेयो मित्ररत्नाभ्याम्	नाम० ६।६४
२३९.	ध्रंसः	कृत्० ४।२६
२४०.	ध्वात् ध्वमः	आख्यात० ३।११
२४१.	न ऋतः को बहुव्रीहौ	नाम० ५।२०
२४२.	न चवर्गः कृशेश्चेक्रीयिते	आख्यात० २।१
२४३.	नदीकारात् सेः	नाम० १।३१
२४४.	न दीर्घाद् वरुणस्य	नाम० ६।१००
२४५.	नद्या यण्	नाम० ६।२६
२४६.	न नृपतीवादिषु	सन्धि० १।२३
२४७.	न बन्धुबिल्वोकारवद्भ्यः	नाम० ६।७८
२४८.	नमिगमिभ्यां कन्०	कृत्० ४।१
२४९.	नमेस्तः कश्चान्तस्य	कृत्० ४।२१
२५०	न वृद्धावविष्णौ	नाम० ५।४
२५१.	न वृषणो वस्वश्वयोः	नाम० ५।१८
२५२.	नसत्तनिसत्तानुत्त०	कृत्० २।५
२५३.	नसो धातुस्थान्निमित्तात्	नाम० ३।१३
२५४.	नात्तुः पदान्तात्०	सन्धि० ३।३
२५५.	नान्तरतमयो०	नाम० ६।८७
२५६.	नान्तादसंख्यादेः संख्यायाः	नाम० ६।८०

२५७.	नामिनस्तत्ते०	नाम० ३।४
२५८.	नामिनो गुणो०	आख्यात० २।११
२५९.	नामिन्धेः	आख्यात० ४।७
२६०.	नाम्नः परेच्छायामपि०	आख्यात० १।१६
२६१.	निगृह्यानुयोगे च	सन्धि० २।११
२६२.	निपातस्य च	सन्धि० १।४
२६३.	निपाते नामिनः सौ	सन्धि० १।३
२६४.	निष्ठर्यदेवहूय०	कृत्० १।४
२६५	निसः सस्य यस्त०	नाम० ३।१
२६६.	नुरादिरनः	नाम० ६।८६
२६७.	नृम्णादीनि बले	कृत्० ४।४३
२६८.	नेतरात्तुः	नाम० १।६
२६९.	नेत् पावकादिषु	नाम० १।४९
२७०.	नेत्वमपुत्रादेः	आख्यात० १।२०
२७१.	नेलयत्यर्दयत्यूनयति०	आख्यात० ३।२०
२७२.	नेश्च पदान्तस्य	नाम० १।२०
२७३.	पञ्चम्यन्तस्यागुणस्य	आख्यात० ४।२१
२७४.	पञ्चम्याः पातौ	सन्धि० ४।२
२७५.	पतिपुत्रपदपृष्ठ०	सन्धि० ४।४
२७६.	पथि च जसि	नाम० १।२५
२७७.	पदन्तादा स्त्रियामृचि	नाम० ४।१
२७८.	पदयोर्वृद्धिर्देवता०	नाम० ६।९९
२७९.	पदेर्व ऐच्चोपधायाः	कृत्० ४।३६
२८०.	पयित्वः जने०	कृत्० ३।२७
२८१.	परस्य च प्रेषणेऽग्नीध्रः	सन्धि० २।२१
२८२.	परिपन्थिपरिपरिणौ०	नाम० ६।७०
२८३.	परेऽपि प्रादयो धातोः	आख्यात० १।१
२८४.	परोक्षा भूते	आख्यात० १।५
२८५.	परौ चोपर्यर्थे	सन्धि० ४।३
२८६.	पर्फरीकादीनि यथा०	कृत्० ३।२४
२८७.	पश्चपश्चा०	नाम० ६।८३
२८८.	पातेर्जुश्च बले	कृत्० ३।४२

२८९.	पातेस्तुरिच्चाग्ने	कृत्० ४।४०
२९०.	पादहृदयनासिका०	नाम० १।११
२९१.	पितरा मातरा च०	नाम० ५।८
२९२.	पीत्व्यादिष्वीः	कृत्० १।११
२९३.	पुंयोगे मुद्गला०	नाम० ४।१०
२९४.	पुंवन्नपुंसकस्य	नाम० १।३०
२९५.	पुनर्वसोरेकवचनम्	नाम० २।८
२९६.	पुरौ भुजेरसुमे०	कृत्० ४।२७
२९७.	पुषेः करक्	कृत्० ४।१७
२९८	पूर्वपदस्थाद् बहुलम्	नाम० ३।१५
२९९.	पूर्वपदस्थान्निमित्तात्	नाम० ३।७
३००.	पूर्वयोः सन्ध्यक्षरयो०	सन्धि० २।२४
३.०१	पूर्ववल्लिङ्गं हेमन्त०	नाम० ५।९
३०२.	पूर्वस्यासूयासम्मति०	सन्धि० २।९
३०३.	पूषा	कृत्० ४।४
३०४.	प्रणवोऽन्त्यस्वरादेः	सन्धि० २।२७
३०५.	प्रणीयोन्नीयोच्छिष्या०	कृत्० १।६
३०६.	प्रतिश्रुतौ च	सन्धि० २।१५
३०७.	प्रत्नपूर्वविश्वेमेभ्यस्थे०	नाम० ६।७३
३०८.	प्रत्यभिवादेऽस्त्री	सन्धि० २।५
३०९.	प्रथेः षिवः सम्प्रसारण०	कृत्० ४।११
३१०.	प्रयै रोहिष्यै अव्यथिष्यै	कृत्० २।११
३११.	प्रश्नाख्यानयोः पदाना०	सन्धि० २।१७
३१२.	प्रेष्यब्रुवोर्हविष्य०	नाम० २।४
३१३.	प्लुतो वाक्यस्या०	सन्धि० २।१
३१४.	बर्हिषो दत्ते	नाम० ६।३२
३१५.	बहुलं तन्वादिषु	नाम० १।३५
३१६.	बहुलं मन्त्वर्थाः	नाम० ६।५८
३१७.	बहुलं लुक् चेक्रीयितस्य०	आख्यात० २।३
३१८	बहुलं लोपो विभ०	नाम० १।२
३१९.	बहुलं वस्वादिभ्यः	नाम० ६।४०
३२०.	बहुलं वो मस्य मन्तोः	नाम० ६।८५

३२१.	बहुलं सार्वधातुकविकरणौ	आख्यात १।१०
३२२.	बहुलं सुभोरुक्तम्	नाम० ५।१७
३२३.	बहुप्रजाः	नाम० ५।२१
३२४.	बहुलं सुभोरुक्तं वन्तु०	नाम० ५।१७
३२५.	बहुलमङ्गीकारे	सन्धि० २।१६
३२६.	बहुलमीड् वचनादिः	आख्यात० ४।१
३२७.	बहुव्रीहेरुपधालोपि०	नाम० ४।२
३२८.	बहुव्रीहौ नेतुः	नाम० ६।६७
३२९.	बह्वादिभ्यश्च	नाम० ४।६
३३०.	बुर्बुरादीनि च	कृत्० ४।३३
३३१.	बृंहेरिस् नलोपश्च०	कृत् ४।१०
३३२.	बोभूतु तेतिक्ते०	आख्यात० २।१०
३३३.	भव्यप्रवव्यास्तव्यर्याः	कृत्० १।५
३३४.	भरिभुजिविदिभ्यो०	कृत्० ३।४५
३३५.	भर्त्सने द्विरुक्तस्य	सन्धि० २।८
३३६.	भवतेः क्विप्०	कृत्० ४।१८
३३७.	भागाच्च वेशो०	नाम ६।४६
३३८.	भावकर्मणोस्तवैकेन्	कृत्० २।१५
३३९.	भावे	नाम० ६।२५
३४०.	भावे च	नाम० ६।६७
३४१.	भिसैस्	नाम० १।८
३४२.	भुवः कसुन्	कृत्० ३।४८
३४३.	भुवः किः	कृत्० ३।१५
३४४.	भूरिदावन्तुः	नाम० ६।८८
३४५.	भूसुधियोर्यवा०	नाम० १।३४
३४६.	भूसूधूभ्रस्जिभ्यो युक्	कृत्० ३।२
३४७.	भृजादीनामभ्यासस्य	आख्यात० ४।२०
३४८.	भृजेरर्वसुन्	कृत्० ३।४७
३४९.	भोराजन्यविशां वा	सन्धि० २।६
३५०.	भोर्नित्यम्	नाम० ४।५
३५१.	मदीनावहन्योजसः	नाम० ६।४५
३५२.	मधुषादीनि यथाम्नातम्	नाम० १।५१

३५३.	मधोः	नाम० ६।३०
३५४.	मधोरण् च	नाम० ६।४५
३५५	मनेरुधश्चान्तस्य	कृत्० ३।१६
३५६.	मनेः श्चत्वो दीर्घश्च	कृत्० ४।३७
३५७.	मन्तुवन्सोर्विसृष्टः	नाम० १।४६
३५८.	मरुद्दत्रम्	कृत्० ४।९
३५९.	मर्मृज्य	आख्यात० ४।११
३६०.	मलोपो यजेरेनमि	आख्यात० ३।१२
३६१.	महाव्याहृतेश्च भुवः	सन्धि० ३।१२
३६२.	मानुषः स्ववस्स्वत०	नाम० १।४५
३६३.	मायोयामण्	नाम० ६।३९
३६४.	मासतन्वोरन्तरार्थे०	नाम० ६।४४
३६५.	मृजनिभ्यामिमन्	कृत्० ३।३६
३६६	यक् चान्तः	कृत्० १।१०
३६७.	यजिह्वेञोः सम्प्र०	आख्यात० ४।१३
३६८.	यजुष्येकेषाम्	नाम० ३।५
३६९	यजेः करणे वा	नाम० २।५
३७०.	यज्ञकर्मण्यावहश्रौषड्०	सन्धि० २।२०
३७१.	यवौ प्लुतविकारयोः स्वरे	सन्धि० १।९
३७२.	याज्यानामन्तस्य	सन्धि० २।२३
३७३.	याज्यान्ते तालव्य०	सन्धि० २।२६
३७४.	यिनन्तादुः	कृत्० १।२१
३७५.	युधिबुधिदृशिभ्य०	कृत्० ३।६
३७६.	युप्लुवोर्य्यपि दीर्घः	कृत्० १।१३
३७७.	युष्मदस्मदोर्वन्तुः सादृश्ये	नाम० ६।५७
३७८.	युष्मदोऽम्०	नाम० १।५०
३७९.	येयजामहे परस्य	सन्धि० २।२२
३८०.	रक्षोयातुभ्यो हनन्याम्	नाम० ६।३३
३८१.	रश्च बहुलं नस्य	नाम० ४।११
३८२.	रात्रेरजसि	नाम० ४।३
३८३.	रात्सस्य	आख्यात० २।२१
३८४.	रिचेर्धसुन् नुश्च०	कृत्० ३।३८

३८५.	रिर्धातोः	आख्यात० २।१८
३८६.	रिवदितिनिर्ऋतयः	कृत्० ४।३
३८७.	रे रयेर्मन्तौ बहुलम्	नाम० ६।६०
३८८	रेरवनीवा मन्त्वर्थे	नाम० ६।५६
३८९.	रेवतीजगतीहविष्याभ्यः०	नाम० ६।३४
३९०.	रोऽन्तश्चरादेरभ्यासस्य	आख्यात० २।२
३९१.	लिशेः क्विप्०	कृत्० ४।३६
३९२.	लोपः कव्यध्वरपृतना०	आख्यात० १।२१
३९३.	लोपव्यत्ययौ विकरणस्य	आख्यात० २।१६
३९४.	लोपश्चेतो बहुलम्	आख्यात० १।६
३९५.	लोपस्तनिपति०	आख्यात० ४।१६
३९६.	लोपस्तयोः शाकल्यस्य	सन्धि० १।१०
३९७.	लोपस्तस्यात्मने	आख्यात० २।१६
३९८.	लोपो घसादिभ्यो०	आख्यात० ३।२१
३९९.	लोपो दन्तस्यातः	नाम० १।७
४ ०.	लोपो नो नामिनो०	नाम० १।१६
४०१.	वतिरुपसर्गाद् धात्वर्थे	नाम० ६।५६
४०२.	वनश्च	नाम० १।४७
४०३.	वन्ध्यादिभ्यो रिन्	कृत्० ३।२५
४०४.	वयस्यासु मूर्धन्यतो०	नाम० ६।३७
४०५.	वयुनं प्रज्ञाप्रशस्ययोः	कृत्० ३।१६
४०६.	वर्षावसन्तहेमन्तेभ्य०	नाम० ६।२२
४०७.	वसुधितिवसुधित०	कृत्० २।७
४०८.	वसेस्तोसुन्नहनि	कृत्० ४।२५
४०९.	वसोः समूहे च	नाम० ६।३१
४१०.	वस्नादोनि यथोपदिष्टम्	सन्धि० ४।६
४११.	वस्मसोः सकारस्य	आख्यात० १।१२
४१२.	वामदेवाद् यण्	नाम० ६।६
४१३.	विकरणे छादयो यमादेः	आख्यात० २।२४
४१४.	विचार्यमाणे सर्वेषाम्	सन्धि० २।१६
४१५.	विजुपे यजेः	कृत्० १।१६
४१६.	विभाषा काकवौ०	नाम० ५।१३

४१७.	विभाषा गोः	सन्धि० १।२१
४१८.	विभाषा नामि०	नाम० १।२२
४१९.	विभाषा स्यमोः	नाम० ४।४
४२०.	विशस्तृशंस्तृ०	कृत्० २।१७
४२१.	विशाखायाश्च	नाम० २।९
४२२.	विषेः क्विस्तुश्च०	कृत्० ४।३८
४२३.	विसृष्टौ दीर्घात्०	सन्धि० ३।८
४२४.	वृकात्तिश्च	नाम० ६।६९
४२५.	वृङ्शीङ्भ्यां पुश्च०	कृत्० ३।४१
४२६.	वृतेरिः	कृत्० ३।३२
४२७.	वृतेश्च	कृत्० ३।११
४२८.	वृत्तौ विभक्त्यलोपो०	नाम० ५।१
४२९.	वृद्धावविष्णौ	नाम० ५।४
४३०.	वृद्धिश्च कृषेः	कृत्० ३।३३
४३१.	वृवृकसुदके	कृत्० ४।३२
४३२.	वेकुरा	कृत्० ४।३१
४३३.	वेशन्तहिमवद्भ्यां भवे	नाम० ६।२
४३४.	व्यत्ययो बहुलम्	आख्यात० १।४
४३५.	व्यत्ययो बहुलं छन्दसि	कृत्० ४।५०
४३६.	व्यत्ययो विभक्तिलिङ्ग०	नाम० २।१
४३७.	व्यवहिताश्च	आख्यात० १।२
४३८.	शंशच्छदिभ्यस्तिलपरिमाणे	नाम० ६।२१
४३९.	शकेर्मन्	कृत्० ३।३४
४४०.	शकेर्वनिप्	कृत्० ३।३१
४४१.	शक्नोतौ णम्कमौ	कृत्० २।१०
४४२.	शमरिष्टशिवेभ्यः करोतौ	नाम० ६।६६
४४३.	शमिता यज्ञे च	कृत्० २।२०
४४४.	शषामादीनि०	आख्यात० ३।१३
४४५.	शसादिषु मांस०	नाम० १।१०
४४६.	शीङ इनुरर्ह्स्वश्च	कृत्० ४।२३
४४७.	शीर्षन् शिरसः	नाम० १।४२
४४८.	शुट् चार्तेः	कृत्० ३।४

४४९	शृणातेः	कृत्० ३।९
४५०.	शौनकादिभ्यश्छन्दसि	नाम० ६।१६
४५१.	श्राताः श्रितमाशोः	कृत्० २।६
४५२.	श्रीग्रामण्योर्नुरामि	नाम० १।३६
४५३.	श्रुदक्षिभ्यामाय्यः	कृत्० ३।२१
४५४.	श्रुश्रृणुकृपॄवृभ्यश्च	आख्यात० ३।८
४५५.	श्वात्रादीनि धने	कृत्० ४।४७
४५६.	षष्ठीयुक्तः पतिरग्निष्टादौ वा	नाम० १।१
४५७.	षो व्युपधस्य०	सन्धि० ४।७
४५८.	सङ्घे चाभ्रात्	नाम० ६।५०
४५९.	सनिंससनिवांसम्	कृत्० २।८
४६०.	सनिष्यदत् कनिक्रदत्	कृत्० २।२१
४६१.	सनोतेर्बहुलम्	नाम० ३।१०
४६२.	सन्वच्च गमेः	कृत्० ३।१८
४६३.	संपरिपूर्वादीनश्च	नाम० ६।५५
४६४.	सप्तनस्तदस्य परिमाण०	नाम० ६।३
४६५.	सभायाः साधावेयः	नाम० ६।६३
४६६.	समानस्य सोऽमूर्ध०	नाम० ५।१४
४६७.	समापं देवयजने	नाम० ५।१६
४६८.	समासान्तादसन्तादत्	नाम० ६।९६
४६९.	समुदि द्रवेर्डः	कृत्० ४।१६
४७०.	समुद्राच्च	नाम० ६।४९
४७१.	सम्बुद्धावयवाः श्वेतवाः०	नाम० १।१३
४७२.	सर्तेर्नीकः	कृत्० ४।३४
४७३.	सर्वदेवाभ्यां तातिः	नाम० ६।६५
४७४.	सव्ये स्थो डुः	कृत्० ३।१३
४७५.	ससूव	आख्यात० ४।९
४७६.	सहस्रात् सम्मितमन्त्वर्थयोः	नाम० ६।५२
४७७.	साकाङ्क्षस्याङ्गः०	सन्धि० २।१२
४७८.	साढचै साढ्वा साढा	कृत्० १।२२
४७९.	सा लेट्	आख्यात० १।८
४८०.	सार्वनामिकमुभयादीनाम्	नाम० १।९

४८१.	सिच् सार्वधातुके कर्तरि	आख्यात० २।१२
४८२.	सुर्ह्रस्वाच्चन्द्रे मन्त्रे	नाम० ५।१२
४८३.	सूक्तसाम्नोरीयः	नाम० ६।६१
४८४.	सृपितृदोः कसुन्	कृत्० २।१४
४८५.	सेन्नसेन्कसेनध्यैन्०	कृत्० २।९
४८६.	सोमादर्हतौ मयडर्थे च	नाम० ६।२९
४८७.	सोमादीनां दीर्घः	नाम० ६।९२
४८८.	सोर्निपातस्य	नाम० ३।९
४८९.	सो विसृष्टस्य	सन्धि० ४।१
४९०.	स्कन्देर्धश्च स्वाङ्गे	कृत्० ३।४४
४९१.	स्तवः सेय्यक्	कृत्० ३।२३
४९२.	स्तुतस्तोमयोश्च	नाम० ३।८
४९३.	स्थमात् स्तुति०	सन्धि० ३।२
४९४.	स्थादेरण् सप्तम्यामा०	आख्यात० ३।१५
४९५.	स्नोरन्तयो०	नाम० १।४३
४९६.	स्याल्लोपो व्यञ्जने	सन्धि० ४।६
४९७.	स्वः पृश्निनर्किो०	कृत्० ४।१९
४९८.	स्वतवानः पायौ	सन्धि० ३।९
४९९.	स्वयम्भुवः क्विप्	कृत्० ४।१३
५००.	स्वरतस्तीकङ्	कृत्० ४।३५
५०१.	स्वरान्तर्डढयो०	सन्धि० ३।१
५०२.	स्वार्थे च	नाम० ६।४५
५०३.	स्वार्थे चेत्	नाम० ६।६२
५०४.	हन्तेरसुन्नेहश्च	कृत्० ४।४८
५०५.	हव्ये च पादान्ते	कृत्० १।१५
५०६.	हाधावहिभेणसुन्	कृत्० ३।४९
५०७.	हिरगुणः	आख्यात० ३।५
५०८.	हिरण्ययहिरण्मयौ	नाम० ६।८२
५०९.	हुच्छेश्चसनोर्लोपश्च	कृत्० ३।७
५१०.	हृग्रहोर्हस्य	आख्यात० ४।१२
५११.	हृभृसृस्तृभ्य ईमन्	कृत्० ३।३५
५१२.	हेः पृष्टप्रतिवचने	सन्धि० २।१०

५१३.	हेतौ च किमः	नाम० ६।७५
५१४.	हैहेप्रयोगे तयोरेव	सन्धि० २।४
५१५.	ह्यस्तन्यद्यतनीपरोक्षाः०	आख्यात० १।६
५१६.	ह्रदय्या अप्सु	नाम० ६।७४
५१७.	ह्रस्वश्चाप्नोतेः	कृत्० ४।१४
५१८.	ह्रस्वो डलकवता०	नाम० १।१४
५१९.	ह्रस्वो मीनातेः	आख्यात० ३।१
५२०.	ह्वरतेर्ह्वर्निष्ठायाम्	कृत्० २।१
५२१.	ह्वरितः सोमे	कृत्०२।३

१५. कातन्त्रवृत्त्यादिग्रन्थेषु स्मृतानि न्यायवचनानि

१. अनिनस्मन्ग्रहणान्यर्थवताऽनर्थकेन च तदन्तविधिं प्रयोजयन्ति ।
२. अनिर्दिष्टकालाः प्रत्ययास्त्रिष्वपि कालेषु भवन्ति ।
३. अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति ।
४. अन्त्याभावेऽन्त्यसदेशस्य ग्रहणम् ।
५. अपवादविषयं परित्यज्योत्सर्गः प्रवर्तते ।
६. अभ्यासविकारेष्वपवादो नोत्सर्गं बाधते ।
७. अर्थवद्ग्रहणे नानर्थकस्य ।
८. अर्थवशाद् विभक्तिविपरिणामः ।
९. अवयवसिद्धेः समुदायसिद्धिर्बलीयसी ।
१०. असिद्धं बहिरङ्गमन्तरङ्गे ।
११. आगमा यद्गुणीभूतास्ते तद्ग्रहणेन गृह्यन्ते ।
१२. आगमात् सर्वादेशो विधिर्बलवान् ।
१३. आदेशादागमो विधिर्बलवान् ।
१४. आद्यन्तवदेकस्मिन् ।
१५. उच्चरितप्रध्वंसिनो ह्यनुबन्धाः ।
१६. उणादिषु सर्वे विधयो विकल्प्यन्ते ।
१७. उत्सर्गापवादयोरपवादविधिर्बलवान् ।
१८. उभयनिर्देशे पञ्चमीनिर्देशो बलवान् ।
१९. उभयपदाश्रितोऽपि वार्णो विधिरन्तरङ्गः ।
२०. एकदेशविकृतस्यानन्यवद्भावः ।
२१. एकयोगनिर्दिष्टानां सहैव प्रवृत्तिः सहैव निवृत्तिः ।
२२. एकवर्णविधिरन्ते प्रवर्ततेऽनेकवर्णविधिः सर्वस्य ।
२३. एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य ।
२४ औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ।
२५. कार्यिणा हन्यते कार्यी कार्यं कार्येण हन्यते ।
२६. कृत्तद्धितसमासेभ्यस्त्वतलभ्यां सम्बन्धाभिधानम् ।

२७. कृत्रिमाकृत्रिमयोः कृत्रिमो विधिर्बलवान् ।
२८. क्वचिदपवादविषये उत्सर्गस्यापि समावेशः ।
२९. क्वचिन्निमित्ताभावे नैमित्तिकस्याप्यभावः ।
३०. गणकृतमनित्यम् ।
३१. गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः ।
३२. ग्रहणवता लिङ्गेन न तदन्तविधिः ।
३३. ज्ञापकज्ञापिता हि विधयोऽनित्याः ।
३४. द्वयोर्विभाषयोर्मध्ये यो विधिः स नित्य एव ।
३५. नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ।
३६. न वर्णाश्रये प्रत्ययलोपलक्षणम् ।
३७. न हि संनियोगशिष्टानामेकापायेऽन्यस्य प्रवृत्तिः ।
३८. नानुबन्धकृतमनेकवर्णत्वं गृह्यते ।
३९. नानुबन्धकृतमसारूप्यम् ।
४०. नानुबन्धकृतमसन्ध्यक्षरान्तत्वम् ।
४१. नित्यादन्तरङ्गं बलीयः ।
४२. नित्यानित्ययोर्नित्यो विधिर्बलवान् ।
४३. निरनुबन्धग्रहणे न सानुबन्धकस्य ।
४४. निर्दिश्यमानानामादेशिनामादेशाः ।
४५. पञ्चम्या निर्दिष्टे परस्य ।
४६. पदयोः सन्धिर्विवक्षितो न समासान्तरङ्गयोः ।
४७. परनिमित्तादेशः पूर्वस्मिन् स एव ।
४८. परान्नित्यं नित्यादन्तरङ्गमन्तरङ्गाच्चानवकाशं बलीयः ।
४९. परिभाषां हि बलाबलयुक्तिर्बाधते ।
५०. पूर्वपरयोः परविधिर्बलवान् ।
५१. पूर्वेणैव सिद्धे पुनर्विधानं पूर्वविधेर्लक्ष्यानुरोधार्थम् ।
५२. प्रकृतेः पूर्वं पूर्वं स्यादन्तरङ्गम् ।
५३. प्रतिलक्ष्यं लक्षणानि भिद्यन्ते ।
५४. प्रत्ययस्य सर्वापहारी लोपः प्रकृतेरन्त्यापहारी ।
५५. प्रत्ययार्थसम्बन्धादुपसर्गसम्बन्धोऽन्तरङ्गः ।
५६. मध्येऽपवादः पूर्वान् विधीन् बाधन्ते न परान् ।
५७. यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते ।
५८. यथोद्देशं सञ्ज्ञापरिभाषे कार्यकालं वा ।

५९. यस्मात् प्रत्ययविधिस्तदादेस्तदन्तस्य ।
६०. यस्य तु विधेर्निमित्तमस्ति नासौ विधिर्बाध्यते ।
६१. यादृग्जातीयस्य विप्रतिषेधो विधिरपि तादृग्जातीयस्य ।
६२. यावत्सम्भवस्तावद्विधिः ।
६३. येन नाप्राप्तौ यो विधिरारभ्यते स तस्य बाधकः ।
६४. येन विधिस्तदन्तस्य ।
६५. येन विना यदुच्चारयितुं न शक्यते तत्तस्योच्चारणार्थम् ।
६६. रूढेर्योगोऽपहारी ।
६७ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ।
६८. लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ।
६९. लुग्लोपे न प्रत्ययकृतम् ।
७०. लोपस्वरादेशयोः स्वरादेशविधिर्बलवान् ।
७१. वर्णविधौ लाक्षणिकपरिभाषाया अनादरः ।
७२. वर्णग्रहणे तदादौ कार्यसम्प्रत्ययः ।
७३. वार्णो विधिरन्तरङ्गः ।
७४. विधिनियमसम्भवे विधिरेव ज्यायान् ।
७५. विशेषातिदिष्टः प्रकृतं न बाधते ।
७६. व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् ।
७७. व्याप्त्यव्याप्त्योर्व्याप्तिरेव श्रेयसी ।
७८. शब्दान्तरस्य विधिः प्राप्नुवन् न नित्यो भवितुमर्हति ।
७९. श्रुतानुमितयोः श्रौतसम्बन्धो विधिर्बलवान् ।
८०. सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव ।
८१. सञ्ज्ञापूर्वको विधिरनित्यः ।
८२. सन्ध्यक्षराणामिदुतौ ह्रस्वादेशे ।
८३. सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ।
८४. सन्नियोगशिष्टानामेकापायेऽन्यतरस्याप्यपायः ।
८५. सप्तम्या निर्दिष्टे पूर्वस्य ।
८६ समासान्तविधेरनित्यत्वम् ।
८७. समुच्चयकल्पनेऽन्वाचयकल्पनाया अन्याय्यत्वम् ।
८८. सर्वविधिभ्यो लोपविधिर्बलवान् ।
८९. सामान्यवाचका हि शब्दाः प्रकरणमन्तरेण विशेषे वर्तितुं नोत्सहन्ते ।

९०. सामान्यविधिरुत्सर्गो विशेषविधिरपवादः ।
९१. सिद्धे सत्यारम्भो विधिर्नियमाय विकल्पाय ज्ञापकाय वेति ।
९२. सूत्रे लिङ्गं सङ्ख्या कालश्चातन्त्राणि भवन्ति ।
९३. स्वं रूपं शब्दस्याशब्दसञ्ज्ञा ।
९४. स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत् ।
९५. स्वरादेशो विधिर्बलवान् ।

१६. दुर्गसिंहव्याख्याता भावमिश्राव्याख्याताः परिभाषाः

[परिभाषासंग्रहे स्वस्यां वृत्तौ याः परिभाषा दुर्गसिंहेन व्याख्याता भावमिश्रेण च न व्याख्याताः, याश्च भावमिश्रेण व्याख्याताः परं दुर्गसिंहेन न व्याख्यातास्तासामियं सूची]

१. अदर्शनं लोपः ५१
२. अभ्यासविकारेष्वपवादो नोत्सर्गान् बाधते ६४
३. उच्चरितप्रध्वंसिनोऽनुबन्धाः ५५
४. औपदेशिकप्रायोगिकयोरौपदेशिकस्यापि ग्रहणम् ४२
५. गणकार्यमनित्यम् २९
६. ज्ञापकज्ञापिता विधयो ह्यनित्याः ६०
७. नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ४९
८. नास्वशब्दोक्तत्वात् ८
९. निरनुबन्धग्रहणे सामान्यग्रहणम् ४५
१०. पञ्चम्या निर्दिष्टे परस्य २२
११. पदयोः सन्धिर्विवक्षितो न समासान्तरङ्ग्योः ६२
१२. प्रथमया च २४
१३. भाविनि भूतवदुपचारः १४
१४. भूतपूर्वकस्तद्वदुपचारः ५०
१५. यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते ४७
१६ यस्य विधेर्निमित्तं नासौ विधिर्बाध्यते ४८
१७. योऽनादिष्टात् स्वरात् पूर्वस्तं प्रति स्थानिवत् ११
१८. वक्तुर्विवक्षितपूर्विका हि शब्दार्थप्रतिपत्तिः ६१
१९. वर्णग्रहणे निमित्तत्वात् ३२
२०. व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् ६५
२१. षष्ठ्या निर्दिष्टे स्वस्य २३
२२ सञ्ज्ञापूर्वकविधिरनित्यः ३०
२३. सन्ध्यक्षराणामिदुतौ ह्रस्वादेशे ४३
२४. सप्तम्या निर्दिष्टे पूर्वस्य २१
२५. सर्वापहारी लोपः प्रत्ययस्य ५३
२६. स्वं रूपं शब्दस्याशब्दसञ्ज्ञा २८

१७. भातमिश्रव्याख्याता दुर्गसिंहव्याख्याताः परिभाषाः

१. अन्तरङ्गबहिरङ्गयोरन्तरङ्गो विधिर्बलवान् ५०
२. अन्तरङ्गाच्चानवकाशं बलीयः ५१
३. अन्तस्था रेफवर्जिताः सानुनासिका निरनुनासिकाश्च १९
४. अपवादविषयं परिहृत्योत्सर्गः प्रवर्तते ५५
५. उपपदविभक्तेः कारकविभक्तिर्बलीयसी ५९
६. उभयोर्विभाषयोर्मध्ये यो विधिः स नित्यः ११
७. एकयोगनिर्दिष्टानां सहैव प्रवृत्तिः सहैव निवृत्तिः ९
८. गुणबाधिका वृद्धिर्भवति ६०
९. गौणमुख्ययोर्मुख्यस्य कार्यं न तु गौणस्य २
१०. न सामान्यशब्दोक्ते १७
११. नित्यं सन्ध्यक्षराणि दीर्घाणि ३७
१२ नित्यानित्ययोर्नित्यो विधिर्बलवान् ४९
१३. नैसर्गिकलाक्षणिकयोर्नैसर्गिकस्यैव ग्रहणं न तु लाक्षणिकस्य ८
१४. परान्नित्यं नित्यादन्तरङ्गमन्तरङ्गाच्चानवकाशं बलीयः ५१
१५. पारिभाषिकं क्वचिदनित्यम् ५८
१६. प्रत्ययस्य सर्वापहारी लोपः २५
१७. प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत् प्रकाशते ६२
१८. यल्लक्षणेनानुपपन्नं तत् सर्वं निपातनात् सिद्धम् ३१
१९. यो यमाश्रित्योत्पद्यते स तं प्रति सन्निपातः,
सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य १२
२०. लुप्तोऽप्यनुबन्धः साध्यसिद्धिवशात् सद्वत् २४
२१. वर्णग्रहणे सवर्णस्यापि ग्रहणम् ४
२२. सामान्योक्तो विधिरुत्सर्गो विशेषोक्तो विधिरपवादः ५३
२३. सूत्रे लिङ्गवचनमप्रमाणम् ६१

१८. परिभाषा-संग्रहे संकलितानिं कातन्त्रपरिभाषासूत्राणि

अथ परिभाषासूत्रम्

१. एकदेशविकृतमनन्यवत् ।
२. नास्वशब्दोक्तत्वात् ।
३. येन विधिस्तदन्तस्य ।
४. अर्थवद्ग्रहणे नानर्थकस्य ।
५. वर्णान्तस्य विधि ।
६. एकवर्णो विधिरन्ते प्रवर्तते ।
७. अनेकवर्णः सर्वस्य ।
८. निर्दिश्यमानानामादेशिनामादेशाः ।
९. स्थानिवदादेशा ह्यवर्णविधौ ।
१०. स्वरादेशः स्वरनिमित्तकः पूर्वविधिं प्रति स्थानिवत् ।
११. न पदान्तद्विर्वचनवर्गान्तानुस्वारप्रथमतृतीयदीर्घलुग्विधिषु ।
१२. योऽनादिष्टात् स्वरात् पूर्वस्तं प्रति स्थानिवत् ।
१३. प्रकृतिग्रहणे चेक्रीयितलुगन्तस्यापि ग्रहणम् ।
१४. न श्तिबनुबन्धगणसंख्यैकस्वरोक्तेषु ।
१५. आगमा यद्गुणीभूतास्ते तद्ग्रहणेन गृह्यन्ते ।
१६ यथासंख्यमनुदेशः समानाम् ।
१७. स्थानेऽन्तरतमः ।
१८. लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ।
१९. अनन्तरस्य विधिः प्रतिषेधो वा ।
२०. विशेषनिर्दिष्टः प्रकृतं न बाधते ।
२१. आद्यन्तवदेकस्मिन् ।
२२. चानुकृष्टं नोत्तरत्र ।
२३. सप्तम्या निर्दिष्टे पूर्वस्य ।
२४. पञ्चम्या निर्दिष्टे परस्य ।
२५. षष्ठ्या निर्दिष्टे स्वस्य ।

२६. प्रथमया च ।
२७. अर्थवशाद् विभक्तिविपरिणामः ।
२८. भाविनि भूतवदुपचारः ।
२९. निमित्ताभावे नैमित्तिकस्याप्यभावः ।
३०. स्वं रूपं शब्दस्याशब्दसंज्ञा ।
३१. गणकृतमनित्यम् ।
३२. संज्ञापूर्वको विधिरनित्यः ।
३३. यं दृष्ट्वा यस्य संभवः स तस्य संनिपातः, संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ।
३४. वर्णग्रहणे निमित्तम् ।
३५ असिद्धं बहिरङ्गमन्तरङ्गे ।
३६. सर्वविधिभ्यो लोपविधिर्बलवान् ।
३७. लोपस्वरादेशयोः स्वरादेशविधिर्बलवान् ।
३८. सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव ।
३९. अपवादविषये क्वचिदुत्सर्गस्यापि समावेशः ।
४०. प्रधानान्वाचयशिष्टयोः प्रधानशिष्टस्तु नित्यः ।
४१. नित्योऽवश्यंभावी भवति ।
४२. अन्त्याभावे अन्त्यसदेशस्यापि ग्रहणम् ।
४३. आगमादेशयोरागमो विधिर्बलवान् ।
४४. आगमात् सर्वादेशो विधिर्बलवान् ।
४५. औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ।
४६. सन्ध्यक्षराणामिदुतौ ह्रस्वादेशे ।
४७. परनिमित्तादेशः पूर्वस्मिन् स एव ।
४८. निरनुबन्धग्रहणे न सानुबन्धस्य ग्रहणम् ।
४९. उक्तार्थानामप्रयोगः ।
५०. यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमस्ति नासौ बाध्यते ।
५१. नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ।
५२. भूतपूर्ववदुपचारः ।
५३ अदर्शनं लोपः ।
५४. प्रत्ययलोपे प्रत्ययलक्षणम् ।
५५. प्रत्ययस्य सर्वापहारी लोपः ।

५६. प्रकृतेरन्तापहारो लोपः ।
५७. यावत्संभवस्तावद्विधिः ।
५९. उच्चरितप्रध्वंसिनो ह्यनुबन्धाः ।
६०. कार्यी निमित्तं कार्यमित्येष निर्देशक्रमः ।
६१. इकारोक्तः सविभक्तिरादेशेऽस्वरः ।
६२. सिद्धे सत्यारब्धो विधिर्नियमाय ज्ञापकाय विकल्पाय वा ।
६३. ज्ञापकज्ञापिता विधयो ह्यनित्याः ।
६४. वक्तुर्विवक्षितपूर्विका हि शब्दप्रवृत्तिः ।
६५ पदयोः सन्धिर्विवक्षितो न समासान्तरङ्गयोः ।
६६. उत्सर्गापवादयोरपवादविधिर्बलवान् ।
६७. व्याख्यानतो विशेषार्थप्रतिपत्तिर्नहि संदेहादलक्षणम् ।

इति परिभाषासूत्रम् ।

●

अथ बलाबलसूत्रम्

६८. यत्र द्वौ प्रसङ्गावन्यार्थविकस्मिन् विषये युगपत् प्राप्नुतः स तुल्यबलविरोधो विप्रतिषेधः ।
६९. विप्रतिषेधे परं कार्यम् ।
७०. पूर्वपरयोः परविधिर्बलवान् ।
७१. प्रकृतेः पूर्वं पूर्वं स्यादन्तरङ्गम् ।
७२. प्रकृत्याश्रितमन्तरङ्गम् ।
७३. प्रत्ययाश्रितं बहिरङ्गम् ।
७४. उपपदसिद्धेः कारकसिद्धिर्बलीयसी ।
७५. लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्य ।
७६. सावकाशनिरवकाशयोर्निरवकाशो विधिर्बलवान् ।
७७. अन्तरङ्गबहिरङ्गयोरन्तरङ्गविधिर्बलवान् ।
७८. आगमादेशयोरागमविधिर्बलवान् ।
७९. अन्तरङ्गाच्चानवकाशं बलीयः ।
८०. वार्णो विधिरन्तरङ्गः ।
८१. वार्णात् प्राकृतं बलीयः ।
८२. कृताकृतप्रसङ्गी यो विधिः स नित्यः ।

८३. नित्यानित्ययोर्नित्यविधिर्बलवान् ।
८४. विधिनियमसंभवे विधिरेव ज्यायान् ।
८५ एकाश्रितमन्तरङ्गम् ।
८६. बह्वाश्रितं बहिरङ्गम् ।
८७. सामान्यविधिरुत्सर्गो विशेषविधिरपवादः ।
८८. गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययो न तु गौणे ।
८९. स्थितानामन्वाख्यानं हि व्याकरणम् ।
९०. यादृग्जातीयस्य विप्रतिषेधो विधिरपि तादृग्जातीयस्य ।
९१. यस्य स्थाने य आदेशास्ते तद्ग्रहणेन गृह्यन्ते ।
९२. श्रुतानुमितयोः श्रौतसंबन्धविधिर्बलवान् ।
९३. नित्यादन्तरङ्गं बलीयः ।
९४. विधिप्रतिषेधयोः प्रतिषेधो विधिर्बलवान् ।
९५. प्रत्यक्षानुमितयोः प्रत्यक्षो विधिर्बलवान् ।
९६. उत्सर्गापवादयोरपवादविधिर्बलवान् ।

इति बलाबलसूत्रम् ।

१९. परिभाषासंग्रहे कालापपरिभाषासूत्रम्

१. असति बाधे।
२. सविशेषणे विधिनिषेधौ विशेषणमुपसंक्रामतो विशेष्ये बाधिते सति।
३. एकदेशविकृतमनन्यवत्।
४. नास्वशब्दोक्तत्वात्।
५. येन विधिस्तदन्तस्य।
६. न संज्ञाविधौ।
७. अर्थवद्ग्रहणे नानर्थकस्य।
८. विशेषनिषिद्धानां सामान्यनिषेधवत्त्वम्।
९. वर्णान्तस्य विधिः।
१०. अनेकवर्णः सर्वस्य।
११. निर्दिश्यमानानामादेशिनामादेशाः।
१२. स्थानिवदादेशो ह्यवर्णविधौ।
१३. क्वचिन्नादेशस्य।
१४ ऊकारोक्तः सविभक्तिरादेशोऽस्वरः।
१५. स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत्।
१६. न पदान्तद्विर्वचनवर्णान्तानुस्वारप्रथमतृतीयदीर्घलुग्विधिषु।
१७. योऽनादिष्टात् स्वरात् पूर्वस्तं प्रति स्थानिवत्।
१८. परनिमित्तादेशः पूर्वस्मिन् स एव।
१९. प्रकृतिग्रहणे चेक्रीयितलुगन्तस्यापि ग्रहणम्।
२०. न शितबनुबन्धगणशबेकाजुक्तेषु।
२१. आगमशासनमनित्यम्।
२२. आगमा यद्गुणीभूतास्ते तद्ग्रहणेन गृह्यन्ते।
२३. यथासङ्ख्यमनुदेशः समानाम्।
२४. स्थानेऽन्तरतमः।
२५. लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्।
२६. क्वचिदर्थवतोऽपि।
२७. अनन्तरस्य विधिः प्रतिषेधो वा।
२८. विशेषातिदिष्टः प्रकृतं न बाधते।
२९. आद्यन्तवदेकम्।

३०. सप्तम्या निर्दिष्टे पूर्वस्य ।
३१. पञ्चम्या निर्दिष्टे परस्य ।
३२. षष्ठ्या निर्दिष्टे स्वस्य ।
३३. अर्थवशाद् विभक्तिविपरिणामः ।
३४. निमित्ताभावे नैमित्तिकस्याप्यभावः ।
३५. स्वं रूपं शब्दस्याशब्दसंज्ञा ।
३६. गणकृतमनित्यम् ।
३७. नञा निर्दिष्टमनित्यम् ।
३८. संज्ञापूर्वको विधिरनित्यः ।
३९. समासान्तश्च ।
४०. संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ।
४१. वर्णग्रहणे निमित्तत्वात् ।
४२. असिद्धं बहिरङ्गमन्तरङ्गे ।
४३. सर्वविधिभ्यो लोपविधिर्बलवान् ।
४४. लोपस्वरादेशयोः स्वरादेशविधिर्बलवान् ।
४५. आगमादेशयोरागमविधिर्बलवान् ।
४६. आगमात् सर्वादेशविधिर्बलवान् ।
४७. अन्यकार्यात् परा द्विरुक्तिः परोक्षालिङादिषु ।
४८. उत्सर्गापवादयोरपवादविधिर्बलवान् ।
४९. अपवादविषये क्वचिदुत्सर्गस्यापि समावेशः ।
५०. पूर्वपरयोः परो विधिर्बलवान् ।
५१. परान्नित्यम् ।
५२. नित्यादन्तरङ्गं बलवत् ।
५३. कृताकृतप्रसङ्गी यो विधिः स नित्यः ।
५४. नित्यानित्ययोर्नित्यः ।
५५. अनन्यपूर्वा लादेशाः ।
५६. बहुषु च शितः ।
५७ सकृद् बाधितं यत् तद् बाधितमेव ।
५८. प्रधानान्वाचयशिष्टयोः प्रधानशिष्टस्तु नित्यः ।
५९. औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ।
६०. एच इण् ह्रस्वत्वे ।
६१. निरनुबन्धग्रहणे सामान्यग्रहणम् ।
६२. उक्तार्थानामप्रयोगः ।

६३. यं विधिं प्रत्युपदेशो निरर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमस्ति नासौ बाध्यते ।
६४. नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ।
६५. भाविनि भूतवदुपचारः ।
६६. अदर्शनं लोपः ।
६७. प्रत्ययलोपे तल्लक्षणम् ।
६८. प्रत्ययस्य सर्वापहारी लोपः ।
६९. प्रकृतेरन्तापहारी लोपः ।
७०. यावत्संभवस्तावद्विधिः ।
७१. उच्चारितप्रध्वंसिनो ह्यनुबन्धाः ।
७२ कार्यी निमित्तं कार्यमित्येष निर्देशक्रमः ।
७३. तद्भेदे विधेर्भेदः ।
७४. लक्षणविधौ लिखनप्रक्रमाद् विधिः ।
७५. येन निर्दिष्टं तस्यैव ।
७६. चानुकृष्टं नोत्तरत्र ।
७७. सिद्धे सत्यारम्भो विधिर्नियमाय विकल्पाय ज्ञापकाय वा ।
७८. उभयोर्विभाषयोर्मध्ये यो विधिः स नित्यः ।
७९. अप्राप्तिपूर्विका हि विभाषा तदुद्देश आदौ ।
८०. सूत्रे लिङ्गवचनमतन्त्रम् ।
८१. द्वित्वबहुत्वयोरेकत्वं बहुत्वार्थं स्वरूपार्थं वा ।
८२. ज्ञापकज्ञापिता विधयो ह्यनित्याः ।
८३. वक्तुर्विवक्षापूर्विका हि शब्दप्रवृत्तिः ।
८४ पदयोः सन्धिर्विवक्षितो न समासान्तरङ्गयोः ।
८५ आख्यातानाख्यातयोराख्यातं बलीयः ।
८६. अव्यक्तं प्रधानगामि ।
८७. गौणमुख्ययोर्मुख्ये कार्यसंप्रतिपत्तिः ।
८८. व्याख्यानतो विशेषार्थप्रतिपत्तिर्नहि संदेहादलक्षणम् ।
८९. अनुशिष्टाननुशिष्टयोरनुशिष्टं प्रमाणम् ।
९०. स्वगुरूपलक्षणोक्तं च ।
९१. परोक्तमविरोधि चेत् ।
९२. एकवर्णो विधिरन्ते प्रवर्तते ।
९३. अन्त्याभावे अन्त्यसदेशस्य ग्रहणम् ।

९४. आगमादेशयोरागमो विधिर्बलवान् ।
९५. सन्ध्यक्षराणामिदुतौ ह्रस्वादेशे ।
९६. यत्र द्वौ प्रसङ्गावन्याथविकस्मिन् युगपत् प्राप्नुतः स तुल्यबलविरोधो विप्रतिषेधः ।
९७. विप्रतिषेधे परं कार्यम् ।
९८. प्रकृतेः पूर्वं पूर्वं स्यादन्तरङ्गम् ।
९९. प्रकृत्याश्रितमन्तरङ्गम् ।
१००. प्रत्ययाश्रितं बहिरङ्गम् ।
१०१. उपपदसिद्धेः कारकसिद्धिर्बलीयसी ।
१०२. लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ।
१०३. सावकाशनिरवकाशयोर्निरवकाशो विधिर्बलवान् ।
१०४. अन्तरङ्गबहिरङ्गयोरन्तरङ्गविधिर्बलवान् ।
१०५. अन्तरङ्गाच्चानवकाशं बलीयः ।
१०६. वार्णो विधिरन्तरङ्गः ।
१०७. वार्णात् प्राकृतं बलीयः ।
१०८. विधिनियमसंभवे विधिरेव ज्यायान् ।
१०९. एकाश्रितमन्तरङ्गम् ।
११०. बह्वाश्रितं बहिरङ्गम् ।
१११. सामान्यविधिरुत्सर्गो विशेषविधिरपवादः ।
११२. गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययो न तु गौणे ।
११३. स्थितानामन्वाख्यानं हि व्याकरणम् ।
११४. यादृग्जातीयस्य विप्रतिषेधो विधिरपि तादृग्जातीयस्य ।
११५. यस्य स्थाने य आदेशास्ते तद्ग्रहणेन गृह्यन्ते ।
११६. श्रुतानुमितयोः श्रुतसंबन्धो बलवान् ।
११७. नित्यादन्तरङ्गं बलीयः ।
११८. विधिप्रतिषेधयोः प्रतिषेधविधिर्बलवान् ।

इति कालापपरिभाषापाठः ।

२०. कातन्त्रविभ्रमस्य कारिकाः

स्याद्यन्तप्रतिरूपकास्त्यादयः

कस्य धातोस्तिबादीनामेकस्मिन् प्रत्यये स्फुटम् ।
परस्परविरुद्धानि रूपाणि स्युस्त्रयोदश ? ॥ १ ।

अग्निभ्यः पार्थिवेभ्यश्च प्रथमान्तं पदद्वयम् ।
एषेति नैतदाबन्तं श्वानस्येति च साधुता ॥ २ ।

भवेतामिति शब्दोऽयं बहुत्वे वर्तते कथम् ? ।
यागः षष्ठीसमासः स्यात् पञ्चमी पर्वतान्न हि ॥ ३ ।

पञ्चड्ढलानि साधुत्वं कथं याति च लक्षणात् ।
मुनीनामिति नो षष्ठी त्याद्यन्तं चाश्व इत्यपि ॥ ४ ।

अष्टाविति कथं द्वित्वं राजेभ्य इति साधुता ।
तेनेत्येतत्त्याद्यन्तं स्यादत्याद्यन्तं भवेदिति ॥ ५ ।

हस्तौ द्विवचनं नेदं शोभनेष्वित्यसप्तमी ।
क्षीरस्येति न षष्ठीयं त्याद्यन्तं वायुरित्यपि ॥ ६ ।

दधिष्येति कथं साधु मधुष्येति तथा परम् ।
केनेत्येतदटान्तं स्यादपापा इत्यसुप्तता ॥ ७ ।

बहुवचनप्रतिरूपकाणामेकवचनता

एतेषां कथमेकत्वं वनानि ब्राह्मणैरमी ।
वृक्षाः पचन्ति येषां यान् वायुभ्यः पार्थिवाः सुराः ॥ ८ ।

शेषाणि पूर्वाणि समान्यजानां फलानि मूलानि हलान्यगूनाम् ।
अभ्राणि नीलानि दलान्यतस्यः शूलानि कूलानि तटान्यपापाः ॥ ९ ।

सुखानि शीलानि नखान्यसास्नाः खलानि पापनि बलान्यचर्चाः ।
पुराणि वर्षाणि मठान्यमीना धनानि सर्वाणि बिलान्यपां च ॥ १० ।

[समुच्चयाच्चकारस्य स्याद्यन्तं भवतीत्यपि ।
तथा जग्लौ दधौ मम्लौ रराविंत्यादयोऽपरे ॥ १ ।

जग्ले-पपे-ददे-मम्ले-जज्ञे-सस्रे-मुखास्तथा ।
विना परोक्षामभ्यूह्याः स्याद्यन्ता बहवो बुधैः ॥ २ ।]

त्यादौ विपरीतानि रूपाणि

अधीये नोपसृष्टस्य शक्यतीत्यस्य साधुता ।
जागर्तीति न जागर्तेरुच्यतीत्यस्य साधुता ॥ ११ ।

विभक्तिव्यत्ययवन्ति

अस्यन्निति न शत्रन्तं व्याघ्रा इत्यस्य चैकता ।
बहुत्वं च तथैतेषामसुर्मेषारुरेव च ॥ १२ ।

स्याद्यन्ताभानि त्याद्यन्तानि

एतानि न स्याद्यन्तानि यस्य तस्याश्वमस्य च ।
शेलुर्बिभीतको वेणु पञ्चेते स्म ऋणानि च ॥ १३ ।

[ततः समुच्चयाच्चस्य शसन्तं पर्वतस्थितिः ।
आगमोऽनुजगृहे राजसे हर हरेऽव्ययम् ॥ ३ ।

समुच्चयात् पुनश्चस्य प्रयोगास्त्यादिजा अमी ।
अस्यास्तस्याश्च यस्याश्च कस्या इति चतुष्टयी ॥ ४ ।]

एकस्य कस्य धातोः स्यात् त्यादौ रूपचतुष्टयम् ।
पर्वाणि पर्वतं पर्व पर्वतोऽपूर्वमेव च ॥ १४ ।

[जलानि वातो वातं च वातः प्रातस्तथैव हि ।
श्यामोऽध्यायोऽनलश्चाप्यक्षरं च समुच्चयात् ॥ ५ ।]

अशोकोऽनौस्तथा वातादश्रीणामरुणोऽवनम् ।
वनानि स्वोऽखिलं यानि शुभानि च रणानि च ॥ १५ ।

[उपलक्षणतो लोके इति रूपाणि विभ्रमे ।
कुण्डे पिण्डे तथा शुण्डे मुण्डे चण्डे च खण्डके ॥ ६ ।]

स्याद्यन्ताभानि त्याद्यन्ताभानि

सास्नाया अकृशोऽताता अमर्मा अवटोऽनृणाम् ।
वेष रेफ रवेऽपेपेरदोधूर्त्तानिलः कुतः ॥ १६ ।

अरये नभसे पयसे वयसे लोके नसे गवे वृक्षे ।
अहयोऽकवेऽयसे रेखे लेखे रजसि रेजेऽलिट् ॥ १७ ।

अद्यौर्नं नञ्समासोऽयं सर्वेषामिति चैकता ।
अन्येषामपरेषां च केषां कासां तथा दश ॥ १८ ।

[समुच्चयाच्चकारस्य चक्रे सम्बोधनं विना ।
अवस्था इति शब्दोऽपि स्यादेकवचनः कथम् ॥ ७ ।]

समासाभं बहुवचनानि च

अगारं द्वे पदे स्यातां प्रथमान्तं शुनस्तथा ।
कर्तृरूपे कथं स्यातां दीयते धीयते तथा ? ॥ १९ ।

समासविभक्तिकर्तृरूपाभानि

त्याद्यन्तमालयं प्रोक्तमसमस्तमजापयः ।
अन्यान्योऽनालयश्चैव ह्यश्वालयमशालयः ॥ २० ।

[अजिनान्यधिक्षताधुक्षतेत्याद्यपराण्यपि ।
शेषे च देवते देवतामित्यादि चकारतः ॥ ८ ।]

स्याद्यन्तसमासाभानि

अव्याधयोऽसमस्तं स्याद् येयेषांचक्रिरे पदम् ।
अक्षेपयस्तथा चान्यदक्षेवयममी वयम् ॥ २१ ।

अप्रसिद्धत्याद्यन्तानि

[असतीति कथं साधु करतीति तथापरम् ।
कथमेतानि साधूनि वोच्यते भवता सह ॥ ९ ।

दुर्लक्ष्ययङन्तानि

मारिरेकाम मामिमीमाम मामीमिले तथा ।
असीदामादिका ज्ञेयाः प्रयोगा अनया दिशा ॥ १० ।]

[मन्ये क्वचित् काव्यशास्त्रादौ निर्दिष्टार्थेषु शब्दानामेतेषां प्रयोगोऽवश्यमेव जातः, अतस्तत्साधनप्रकारस्य प्रदर्शनायैष प्रयास आचरितः । व्याकरणस्य लोकप्रयुक्त-शब्दसाधनफलकत्वादेतदेव वक्तुं शक्यते ।]

२१. चर्करीतरहस्यस्य कारिकाः

चर्करीताभिधो धातुश्चेक्रीयितलुकीष्यते ।
सप्तम्या वैषयिक्या च तस्य द्विर्वचनं भवेत् ॥ १ ।

चेक्रीयिते च योऽभ्यासस्तत्र यद् यद् विधीयते ।
तत्सर्वं चर्करीतस्याभ्यासे रीविषये रिरौ ॥ २ ।

ईडुद्वृद्धिनिमित्ते च चर्करीताद् विभाषया ।
चर्करीतादनो लोपो विकरणाभिधस्य तु ॥ ३ ।

स्वरे चास्य गुणो न स्यादुपधायाश्च नामिनः ।
चोक्रुशीति प्रयोगोऽयं गुणिनि सार्वधातुके ॥ ४ ।

असार्वधातुके तद्वच्चकाराद् (बहुलात्) यङ्लुकोष्यते ।
बेभिदिता प्रयोगोऽयं स्याद् बेभिदाञ्चकार च ॥ ५ ।

चेक्रीयिते च यत्कार्यमुक्तं चरफलोस्तथा ।
तत्सर्वं चर्करीतस्य वदन्त्यपि मनीषिणः ॥ ६ ।

तद्वत् स्वपि-स्यमि-व्येञां चंचूर्ति चंचुरीति च ।
पंफुल्ति पंफुलीत्येव सोषुप्ति सोषुपीति च ॥ ७ ।

सेसेन्ति सेसिमीत्येव वेवेति वेवयीति च ।
ग्रह्यादीनां च सौत्राणां सम्प्रसारणमिष्यते ॥ ८ ।

जरीगृहीति जर्गर्ढि जरिगृहीति कैश्चन ।
नास्माभिस्तेन तेषां तु जाग्राढि जाग्रहीति च ॥ ९ ।

जागृढो जागृहत्यत्रागुणत्वात् सम्प्रसारणम् ।
कृताभ्यासविधेराद्यप्रकृतेश्च ब्रुवो वचिः ॥ १० ।

समुदायाश्रितानेकस्वरत्वादनिटामपीट् ।
चायप्यायोस्तथा धात्वोर्यथासङ्ख्यं किपौ स्मृतौ ॥ ११ ।

प्रकृतिग्रहणेनैव चर्करीतग्रहो भवेत् ।
अद्यतन्यां भवो वस्तु परैश्चान्यैरुविष्यते ॥ १२ ।

बोभवेति परोक्षायां भुवो वो न व्यवस्थया ।
तिङ्गणैकस्वरैरुक्ते अनुबन्धे च नेष्यते ।। १३ ।

नाऽऽत्मनेपदमिच्छन्ति केचित्तु भावकर्मणोः ।
आत्मनेपदमिच्छन्ति परेऽत्र भावकर्मणोः ।। १४ ।

चेक्रीयितलुगन्ताच्च नात्मनेपदमन्ततः ।
शेषत्वाच्चर्करीताच्च परस्मैपदमेव च ।। १५ ।

चर्करीतादिनो यण्वद् वृद्धिर्वा तत्र केचन ।
हनेरिनि हतो घातो घतश्चेति प्रयोगतः ।। १६ ।

अन्ये तु व्यञ्जनादेरनेकस्वरचुरादितः ।
इनन्ताद् यङमिच्छन्ति तल्लोपमपि मेनिरे ।। १७ ।

क्षुभिवाहिस्वनीत्यत्रानिङ् घुषिरविशब्दने ।
विशब्दन इनोऽभावाद् विकल्पेनश्चुरादितः ।। १८ ।

एतस्माद् व्यञ्जनादेरनेकस्वराद् यङिष्यते ।
तल्लोपमपि वाञ्छन्ति परे चान्ये प्रयोगतः ।। १९ ।

रामचन्द्रनृपद्वारि कलापाध्यापने रतः ।
कण्ठहारकविः सोऽहं विवृणोमि रहस्यकम् ।। २० ।

२२. राजस्थानेषु प्रचलितानि कातन्त्रस्य विकृतसूत्राणि

[प्रथमपादस्य विकृतरूपाणि युधिष्ठिरमीमांसकेन **'संस्कृत-व्याकरण-शास्त्र का इतिहास'** इत्याख्ये ग्रन्थे, डॉ० कन्हैयालालशर्मणा च **'हाड़ौती बोली और साहित्य'** नामके ग्रन्थे पाठान्तरपुरस्सरमुपस्थापितानि । मया चात्र उज्जयिनीस्थे विक्रमविश्वविद्यालयीये सिन्धिया-प्राच्यविद्या-शोध-प्रतिष्ठाने सङ्गृहीतस्य हस्तलेखस्य पाठः प्रस्तूयते । पाठे चास्मिन् बहुत्र प्रमादः परिलक्ष्यते ।]

पहली पाटी (प्रथमः पाठः)

सिधो वरणा समामनाया, चत्रो चत्र दशा दउसवैराः, दसे समाना, तेषां दुदवा वरणा नशी सवरणा, पुर्वो हसवाः, पारो दिरघा, सारो वरणा विरच्यो नामा, इकरादीनि संधिक्षराणि, कादानय ववाण-जयनामिः, ते विरघाः पञ्चा पञ्चः, विरगानायं प्रथम दुतीया शाषोसाहंच्याघोषा, घोषाबतोरणः, आणुनासिकाः निन्यणुनामाः, अंश-ताजेरे लउवा, उषमणशंखोसाहाः, आईता विसारजनीयाः, काईता जेहवामूलीयाः, पाईता पद्मानीया, आईहे अंतनूशवाराः, पूर्वो पालैरोघा पालपदंपदः, विरयो नामी शरंपरः वरणनहमुः, अननुक्रं मया नमसलेक-जेत्रुः, लोकोपचाईरा दुरगणाशीधिः ।

एति शंधिः सूत्रता प्रथमा सन्धि समापता । १ ।

दूसरी पाटी (द्वितीयः पाठः)

समानसी वरणा दिरघी भवन्ती पराई च लोपः, आवरणा

ईवरणा ईवरणेई, उवरणा उवरणे, ऋवरणे रौः लृवरणे लौः, इकारः ईईकारसौ, उकारौ उउकारसौः, इवरणो जवसिवरणाः निचप्रलोप्या, बंभुवरणा, रिवरीवरणा, लंबरावरणा, इयोइयाजुः, उवोउवावुः, अजादिनायं जहवालोपः पालपदंतः नऊवालोपः इशपतिः करतिः, अदोत्पालपदंतः लोपनकाराविजनः, नवा जनेलुसंनासंधियाः ।

एताः सन्धीसूत्रताः दुरता संधिस्समापता । २ ।

तीसरी पाटी (तृतीयः पाठः)

ऊदांता आईरउवानिपंताः सरपकरताः, दुरवचनमनिः, बहुवचनमनिः, अप्रथमेशेभे उसाकाराः सवरिजवाः पमा मकाराः तिभवइहाकाराः पूर्वं चत्रथानवापारारूपं तकारा ल च ट वर्णषुः च्यां णुल्वोः न्याणुनानुयादः षटा स्याः ।

इति संधिसूत्रता त्रीती सन्धि समाप्ता । ३ ।

चौथी पाटी (चतुर्थः पाठः)

विरगप्रथमा पदान्ता कारे घोषा वतिसुं सत्रता पेसाणुः, पञ्चमस पञ्चमियायू शोरशताश्च वरणा, विरगा हंहयो पढाया सारोधीका नेउतो, तेवंता च छाए सुकारं टगए, सुकारं तथा उए सुकारः त्वे लं जं जन्या साकारो कारः शणचवोडढणाः पछामकारः, योनिसवारः विजनेवाणाः तादु, विरगाः पञ्चम बछणनी दुरवा ।

इति संधिसूत्रता चतुर्ति संधि समापता । ४ ।

पाँचवीं पाटी (पञ्चमः पाठः)

वीशारजनीया चे छे वा शः, टे ठे वा षः, ते थे वा सः, कखयोरजहवामुला वा, पफायोरपदा अरणवाः, संदेशवासवाः पारारूपः, अमकारीः स्मिरधीः, आया घोषवतो ईनः, अपरो लोप्याः निसरजरुहा

घोसोबन्धोपायगाः द्वरकरोलगामः नारीसुचयामाणिजः दिनदसकराम् कामप्रपातकरानहाकाइयराये वारणैः भाः आभो आभ्या आः मामाइए-मेसारेः, घोषवता लोपः, हरे ज्ञानपरोपः एकयौ दूराः वोशारजनी लोपः नावीशरजनी लोपः, पुनामशंधा रहुरे लोपः, आ च पुर्वो दिर्घा दवरीभवः, सवरेपबामकारः वा बहुतां हषहोथकै सनै, हकेकारणै जावपदैजंजालसूणा रैसषीयां, परीहाहाजीका चानुटेने हलगेजब अबायाक्रम रकवलगायके जीवमोलेगयोः रातेरमाने सयणतं जीसुष, हगयोः सहामेचो ढ अ पर पारके बरबा साराषाः, परीहाहाजा आह षसहायो न जायसंता ईमाः कारिकाः। ७।

एती सन्धिः सुत्रताः पञ्चमी सन्धिस्समापता। ५।

सूत्रसंख्या ७९

●

२३. कातन्त्रीयशिक्षासूत्राणि

कातन्त्रीयशिक्षा क्वचिद् हस्तलेखेषु दृश्यते, कस्यायं प्रयास इति न विद्मः। अत्र अवर्णस्य कण्ठ इत्येव स्थानं नोक्तम्, किञ्च केषांचिन्मते तस्य मुखवर्तीनि सर्वाण्येव स्थानानि सम्भवन्तीति निर्दिष्टम्। अवर्णस्य सर्वमुखस्थानीयत्वादेव आपदित्यादौ आकारस्याऽऽकारादेशविधानाय "अवर्णस्याऽऽकारः" (३।८।१८) इति सूत्रे वर्णग्रहणं क्रियते, अन्यथा सर्वमुखस्थानीयस्य आकारस्य सर्वमुखस्थानीय आकारः सम्पद्येत। उपलब्धानि कातन्त्रीयशिक्षासूत्राणीह लिख्यन्ते—

१. अवर्ण-कवर्ग-ह-विसर्जनीयाः कण्ठ्याः। २. इवर्ण-चवर्ग-य-शास्तालव्याः। ३. ऋवर्ण-टवर्ग-र-षा मूर्धन्याः। ३. लृवर्ण-तवर्ग-ल-सा दन्त्याः। ५. उवर्ण-पवर्गोपध्मानीया ओष्ठ्याः। ६. ए ऐ कण्ठतालव्यौ। ७. ओ औ कण्ठ्योष्ठ्यौ। ८. वो दन्त्योष्ठ्यः। ९. अवर्णः सर्वमुखस्थान-मित्येके।

१०. अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलञ्च दन्ताश्च नासिकोष्ठञ्च तालुकम्॥ इति।

११. अनुस्वारोऽनुनासिकः।

[प्रकाशिते कलापसूत्रे पञ्चमं सूत्रं तृतीयस्थाने पठितम्, तदेवोचितं प्रतिभाति, इवर्णानन्तरमुवर्णस्यैव वर्णसमाम्नाये पठितत्वात्, लोके तस्यैव क्रमस्य समादरसत्त्वाच्च। एकादशं सूत्रं हस्तलेखे न दृश्यते। प्रकाशितग्रन्थे पाठो न समीचीनः, केवलनासिकास्थानोच्चारणस्यानुस्वार-स्यानुनासिकसञ्ज्ञाया व्याख्याकारैः प्रतिषेधकरणात्।]

•

२४. अथ जौगराजविरचिता पादप्रकरणसंगतिः

[अयं लघुग्रन्थः श्रीपादकृष्णबेल्वल्करविरचितस्य **Systems of Sanskrit Grammar** इत्याख्यग्रन्थस्य ११८-१२० पृष्ठेषु प्रकाशितो वर्तते । सन्ध्यादिकृदन्तेऽस्मिन् ग्रन्थे प्रतिपादं विषयसंगतिर्दर्शिता ।]

ॐ नमः शिवाय । ॐ ।

आराध्य षण्मुखमवाप्तवरप्रसादः कारुण्यपूर्णहृदयः किल शर्ववर्मा ।
लोकस्य मोहतिमिराहृतये व्यधत्त संक्षेपतः प्रकरणत्रितयात्मशास्त्रम् ॥ १ ।
तत्रादितो व्यधित वर्णपदेषु सन्धिं तत्रानुनासिकपदं बहुकारकादि ।
आख्यातिकं तदनु साध्यपदं क्रियाख्यमेतावतैव हि समन्वयमात्रलाभः ॥ २ ।

संज्ञाश्च परिभाषाश्च प्रथमे पाद आदिशेत् ।
द्वितीये स्वरसन्धिं च तृतीये तन्निषेधनम् ॥ ३ ।
वैयञ्जनं चतुर्थे च सन्धिं वैसर्गिकं परे ।
षष्ठे प्रथमवच्चैवं सन्धिप्रकरणं जगौ ॥ ४ ।
नाम्न आद्ये स्वरान्तस्य लिङ्गस्य स्यादिनिर्णयः ।
स्वरान्तव्यञ्जनान्तस्य द्वितीये युष्मदस्मदोः ॥ ५ ।
तृतीयेऽपि त्यदादीनामित्थं नामपदस्थितिः ।
चतुर्थे कारकस्येह विनियोगोऽथ पञ्चमे ॥ ६ ।
समासवृत्तिसिद्धस्य तद्धितेष्वपि वर्तनम् ।
षष्ठेऽथ सप्तमे प्रोक्तलिङ्गात् स्त्रीप्रत्ययात् स्त्रियाम् ॥ ७ ।
इदं नामपदं सिद्धं संक्षेपात् समुपादिशत् ।
तदन्तन्तमतो वित्तं वाङ्मयस्योपबृंहणम् ॥ ८ ।

आख्यातेष्वादितः कालपुरुषार्थं नियोजनाः ।
न्यात्युद्देशे (?) द्वितीयेऽपि सनादिप्रत्ययान्तता ॥ ९ ।

ततो विकरणा आत्मनेपरस्मैविनिर्णयः ।
तृतीयेऽभ्यासकार्याणि चतुर्थे सम्प्रसारणम् ॥ १० ।

आदेशागमलोपादि पञ्चमे तु गुणागुणाः ।
तन्त्रं वाऽऽणपदं षष्ठं सप्तमे सेडनिट्कता ॥ ११ ।

संकरोऽष्टम इत्येवमाख्यातिकपदक्रमः ।
संचिन्तनीयो धात्वर्थकालभेदाद् विचक्षणैः ॥ १२ ।

यथोसौत्र (?) जयत्येको यः परोपकृतौ रतः ।
योऽपि धन्यो धनं धत्ते सोऽत्यन्तं सुखमश्नुते ॥ १३ ।

कृतस्तव्यादयः सोपपदानुपपदाश्च ये ।
लिङ्गप्रकृतिसिद्ध्यर्थं ताङ्गौ शाकटायनः ॥ १४ ।

तत्राऽऽद्यपादे कृत्तन्त्रं पञ्चपाद्यां कृतां(?)विधिः ।
सोऽपि साधनकालादिविभागेनेति निर्णयः ॥ १५ ।

स्याद्यन्तत्वात् सुसिद्धत्वान्न तान् सूत्रकृदब्रवीत् ।
दिशन्नदीदृशद्वाहिबन्सिनिष्ठादुदीरणम् (?) ॥ १६ ।

धातोः परे कृतो वुण्तृजादयस्ते च कर्तरि ।
आदौ तव्यादयस्तेषां कृत्यास्ते भावकर्मणोः ॥ १७ ।

अण्णादयस्सोपपदास्ते च कालत्रये मताः ।
भूते क्वन्स्वादयो वर्तमाने शन्तृङ्कनादयः ॥ १८ ।

उणादयः स्युर्बहुलं ये ते शास्त्रान्तरे स्थिताः ।
भविष्यति स्यत्स्यमानक्रियार्थोपपदा मताः ॥ १९ ।

घञलृकारयुक्ताद्या भावे पुंस्त्रीनपुंसके ।
संज्ञायां प्रासनासादा (?) वकर्त्तरि च कारके ॥ २० ।

करणे चाधिकरणे घ्वादिरन्यत्र चेष्यते ।
ज्ञेयो धात्वर्थसंबन्धे क्वाणंखन्तु(?)विशेषणात् ।। २१ ।

कर्ताऽन्यार्थोपदेशोऽपि ज्ञाता पूज्यो मतः सताम् ।
प्रकीर्णतन्त्रमित्येवं पादप्रकरणस्थितिः ।। २२ ।

यद्यप्यन्यानि कार्याणि पादेष्वेषु समासते ।
तथापीयन्ति बाहुल्याभिप्रायेणोदितानि हि ।। २३ ।

एवं शास्त्रमिदं सूत्रमात्रेण पठितं सदा ।
तदेति काऽपि सौभाग्यलक्ष्मीः किं नेति शृण्वताम् ।। २४ ।

नाम्नः पादैः कारकस्य स्वरूपं द्वित्रैराख्यातस्थितैश्च क्रियायाः ।
कान्तैश्चालोच्याभिधानं क्रमेण श्लोकाद्यर्थावेदने दन्तकर्णम् ।। २५ ।

श्रुत्वा साहित्यानि सूक्ष्माण्यथादौ ज्ञात्वा काव्याकूतवृत्तार्थशब्दान् ।
स्वप्रागल्भ्याच्चेतिहासादि बुद्ध्वा काव्याभ्यासे तिष्ठताच्छब्दयत्नः ।। २६ ।

वाग्देवी सा सर्वतो भ्राजमाना
पात्रापात्रावेक्षणेन प्रसादान् ।
कुर्वत्यन्तः कस्यचित् स्वाध्ययस्य (?)
स्फीतिं सूतेऽथेतरस्याप्यशक्तिम् ।। २७ ।
... ...
... .*
.....पादप्रकरणस्थितिम् ।
पठतां शास्त्रमाभाति करस्थं शार्ववर्मणम् ।। ४९ ।

द्विजराजजोगराजोऽरचयद्दीपनाय शिष्याणाम् ।
पादप्रकरणसंगतिमेतां कातन्त्रसूत्राणाम् ।। ५० ।

।। इति जोगराजविरचिता पादप्रकरणसंगतिः समाप्ता ।।

---

* At this place a few unimportant stanzas are omitted.

२५. कलापधातुगणेष्वन्तर्गणाः

गणाः	अन्तर्गणाः	धातुसङ्ख्या
भ्वादिः	(१) द्युतादिः	२२
,,	(२) वृतादिः	०५
,,	(३) घटादिः (षानुबन्धाः)	१४
,,	,, (मानुबन्धा अमन्तादीन् विहाय)	४५
,,	(४) ज्वलादिः	३३ (३०)
,,	(५) यजादिः	०९
अदादिः	(६) भादिः	१२
,,	(७) जक्षादिः	०५
,,	(८) रुदादिः	०५
,,	(९) जुहोत्यादिः	२४
दिवादिः	(१०) पुषादिः	६४
,,	(११) रधादिः	०८
,,	(१२) मुहादिः	०५
,,	(१३) शमादिः	०८
तुदादिः	(१४) मुचादिः	०८
,,	(१५) तृन्फादिः	१८

(अष्टादशानां मध्येऽष्टसु नोपधेष्वेव नलोपाभाव उपपद्यते इत्यष्टावेव ते मन्तव्या इति टीकाकारादिमतम्)

तुदादिः	(१६) कुटादिः	३५
क्र्यादिः	(१७) प्वादिः	२२
,,	(१८) ल्वादिः	२१
चुरादिः	(१९) युजादिः	४४

(टीकाकारो दृभ सन्दर्भे (चु० २८५), दुढि अन्वेषणे (चु० २९९) इति धातुद्वयं न पठति, तेन तन्मते ४२ मिता एव धातवो युजादौ बोद्धव्याः)

,,	(२०) अदन्ताः	८४

धातुगणः	अन्तर्गणाः	धातुसङ्ख्या
चुरादिः	(२१) रुचादिः	अनुदात्तानुबन्धाः
,,	(२२) यजादिः	स्वरितानुबन्धाः
,,	(२३) जपादिः	६
,,	(२४) त्वरादिः	९
,,	(२५) प्रच्छादिः	३
,,	(२६) विदादिः विद-आदन्त-द्विषः	
,,	(२७) भृजादिः	७
,,	(२८) मीनात्यादिः	३
,,	(२९) दादिः	९

२६. कलापव्याकरणे व्याख्यातसञ्ज्ञानां वर्णानुक्रमेण सूची

क्र० सं०	संज्ञा	अ०पा०सू०सं०	क्र० सं०	संज्ञा	अ० पा० सू० सं०
१.	अग्निः	२।१८	२७.	कृत्यः	४।२।४६
२.	अघोषः	१।१।११	२८.	क्रियातिपत्तिः	३।१।३३
३.	अद्यतनी	३।१।२८	२९.	गुणः	३।८।३४
४.	अधिकरणम्	२।४।११	३०.	घुट्	२।१।३,४
५.	अनुनासिकः	१।१।१३	३१.	घोषवान्	१।१।१२
६.	अनुबन्धः	३।८।३१	३२.	चेक्रीयितम्	३।२।१४
७.	अनुषङ्गः	२।१।१२	३३.	जिह्वामूलीयः	१।१।१७
८.	अनुस्वारः	१।१।१९	३४.	तत्पुरुषः	२।५।७,८
९.	अन्तस्था	१।१।१४	३५.	दा	३।१।८
१०.	अपादानम्	२।४।८,९	३६.	दीर्घः	१।१।६
११.	अभ्यस्तम्	३।३।८६,८७	३७.	द्वन्द्वः	२।५।११
१२.	अभ्यासः	३।३।८५	३८.	द्विगुः	२।५।६
१३.	अव्ययीभावः	२।५।१४	३९.	धातुः	३।१।९; २।१६
१४.	आत्मनेपदम्	३।१।२	४०.	धुट्	२।१।१३
१५.	आशीः	३।१।३१	४१.	नदी	२।१।९
१६.	उत्तमः (पुरुष):	३।१।३	४२.	नामी	१।१।७
१७	उपधा	२।१।११	४३.	निष्ठा	४।१।८४
१८.	उपध्मानीयः	१।१।१८	४४.	पदम्	१।१।२०
१९.	उपपदम्	४।२।२	४५.	पञ्चमी	३।१।२६
२०.	ऊष्मा	१।१।१५	४६.	परस्मैपदम्	३।१।१
२१.	करणम्	२।४।१२	४७.	परोक्षा	३।१।२९
२२.	कर्ता	२।४।१४	४८.	प्रथमः	३।१।१३
२३.	कर्म	२।४।१३	४९.	बहुव्रीहिः	२।५।९,१०
२४.	कर्मधारयः	२।५।५	५०.	भविष्यन्ती	३।१।३२
२५.	कारितम्	२।२।९-११	५१.	मध्यमः (पुरुषः)	३।१।३
२६.	कृत्	४।२।७	५२.	लिङ्गम्	२।१।१

क्र० सं०	सञ्ज्ञा	अ०पा०सू० सं०	क्र० सं०	सञ्ज्ञा	अ० पा० सू० सं०
५३.	वर्गः	१।१।१०	६५.	समानः	१।१।३
५४.	वर्तमाना	३।१।२४	६६.	समासः	२।५।१
५५.	विकरणः	३।२।३२	६७.	सम्प्रदानम्	२।४।१०
५६.	विभक्तिः	२।६।२४	६८.	सम्प्रसारणम्	३।८।३३
५७.	विसर्जनीयः	१।१।१६	६९.	सम्बुद्धिः	२।१।५
५८.	वृद्धिः	३।८।३५	७०.	सवर्णम्	१।१।४
५९.	व्यञ्जनम्	१।१।९	७१.	सार्वधातुकम्	३।१।३४
६०.	शिट्	३।८।३२	७२.	स्वरः	१।१।२
६१.	श्रद्धा	२।१।१०	७३.	हेतुः	२।४।१५
६२.	श्वस्तनी	३।१।३०	७४.	ह्यस्तनी	३।१।२७
६३.	सन्ध्यक्षरम्	१।१।८	७५.	ह्रस्वः	१।१।५
६४.	सप्तमी	३।१।२५			

२६. अव्याख्यातसञ्ज्ञाशब्दानां वर्णानुक्रमेण सूची

१.	अनुस्वारः	१।४।८	१७	प्रथमा	२।४।१७
२.	अपृक्तः	४।१।३४	१८.	बहुवचनम्	१।३।३
३.	अव्ययम्	२।२।६४; ४।४	१९.	लघु	३।२।१३
४.	आख्यातम्	२।६।४०	२०.	लुक्	२।१।७६
५.	आगमः	२।१।६	२१.	लोपः	१।२।१,१७
६.	एकवचनम्	३।१।२१	२२.	वर्णः	१।१।१
७.	कर्मप्रवचनीयः	२।४।२३	२३.	वा	२।१।१८
८.	कारकम्	२।६।४८	२४.	विभाषा	२।१।२८
९.	गुरु	३।२।१९	२५.	विरामः	२।३।४४, ६२
१०.	चतुर्थी	२।४।१९	२६.	विसृष्टः	२।५।२९;३।८।२
११.	तृतीया	२।४।१९	२७.	षष्ठी	२।४।१९
१२	द्वितीया	२।४।१९	२८.	संयोगः	२।३।५४,५५
१३.	द्विवचनम्	१।३।२	२९.	सङ्ख्या	२।१।७५
१४.	निपातः	१।३।१	३०.	सन्धिः	१।५।१६
१५.	पञ्चमी	२।४।१९	३१.	सप्तमी	२।४।१९
१६.	प्रत्ययः	२।२।६५; ६।४४; ३।२।१	३२.	सर्वनाम	२।१।२५;४।६।६९

इति कातन्त्रव्याकरणविमर्शाभिधे शोधप्रबन्धे पञ्चमः संज्ञाविचाराध्यायः ।

●

२७. उपसर्गसूत्राणि

[कलापसूत्रम्-ग्रन्थस्य ११७ तमे पृष्ठे मुद्रितानि]

१. **प्र** ग्रन्थारम्भोत्कर्षसर्वतोभावप्राथम्यख्यात्युत्पत्तिव्यवहारेषु ।
२. **परा** भङ्गानादरप्रत्यावृत्तिन्यग्भावादिषु ।
३. **अप** अनादरभ्रंशासाकल्यवैरूप्यत्यागनञर्थेषु ।
४. **सम्** प्रकर्षश्लेषनैरन्तर्यौचित्याभिमुख्येषु ।
५. **अनु** पश्चात्सादृश्यलक्षणवीप्सेत्थम्भावभागहीनसहार्थसामीप्यदीर्घपुनरर्थेषु ।
६. **अव** निश्चयासाकल्यानादरेषु ।
७. **निर्** अत्यर्थनिषेधनिश्चयबहिष्करणेषु ।
८. **दुर्** निषेधकष्टनिन्दावक्षेपणेषु ।
९. **अभि** समन्तादुभयार्थलक्षणवीप्सेत्थम्भावधर्षणेषु ।
१०. **वि** विशेषवैरूप्यनञर्थगतिदानेषु ।
११. **अधि** उपरिभावे ।
१२. **सु** पूजनायासातिशायनेषु ।
१३. **उद्** ऊर्ध्वोत्कर्षप्राकट्यनैकट्येषु ।
१४. **अति** अतिशयक्रान्तिपूजासंभावनेषु ।
१५. **नि** निश्चयनिषेधयोः ।
१६. **प्रति** लक्षणव्यावृत्तिप्रसक्तीत्थम्भावत्यागप्रत्यर्पणसादृश्यविरोधवीप्सासमाधिषु ।
१७. **परि** सर्वतोभावातिशयवीप्सेत्थम्भावचिह्नभागत्यागनियमेषु ।
१८. **अपि** आवरणसंभावननिन्दानुज्ञाल्पत्वसमुच्चयेषु ।
१९. **उप** अनुगतिपश्चाद्भावानुकम्पाधिक्यहीनसामीप्यप्राथम्येषु ।
२०. **आङ्** समन्ताद्ग्रहणप्रत्यावृत्तीषदर्थमर्यादाव्याप्तिषु ।

इति पुरुषोत्तमदेवविरचितम् उपसर्गसूत्रं समाप्तम् ।

●

परिशिष्टम्—१

कातन्त्रव्याकरणस्य वैशिष्ट्यम्

पूर्वाभासः

शब्दानां तत्त्वावबोधाय उपयुक्तं पदसाधुत्वलक्षणं व्याकरणं षट्सु वेदाङ्गेष्वन्यतमं प्रधानं चाभिमतम्। इदं क्वचिदष्टधा क्वचिच्च नवधाऽप्युक्तं वर्तते। व्याकरणशास्त्रीयप्रयोजनविशेषस्य सिद्धये आचार्या बहून् ग्रन्थान् व्यरचयन्। तत्र महर्षिपाणिनिः शिष्टज्ञानार्थमष्टाध्यायीं प्रणिनाय। शिष्टैः प्रयुक्तानामभिमतानां वा शब्दानां साधुत्वबोधाय पाणिनिना सूत्राणि प्रणीतानीत्यर्थः। ते च शिष्टा यादृशा अभिमतास्तथा **पृषोदरादीनि यथोपदिष्टम्** (**पा०** ६।३।१०९) इतिसूत्रव्याख्यानावसरे **महाभाष्ये** परिभाषिताः सन्ति।

यद्यपि **विचित्रा हि सूत्रस्य कृतिः पाणिनेः** इत्यादिभिर्बहुभिर्वचनैः पाणिनीयव्याकरणे क्वचिद् दोषोद्भावनमिवाभाति, तथापि पतञ्जलेः पूर्वमेवाष्टाध्याय्या अध्ययनाध्यापनादावुपयोगः कुमारदेशपर्यन्तम्, काशिकाकाराच्च पूर्वं भारताद् बहिरपि समभूदित्यत्र **आकुमारि यशः पाणिनेः** (**म० भा०** १।४।८९), **इतिपाणिनि, तत्पाणिनि, पाणिनिशब्दो लोके प्रकाशते** (**का० वृ०** २।१।६) इत्यादिवचनानि साक्षिरूपाणि भवन्ति। अधुना वैदेशिका अपि समीक्षकाः पाणिनीयव्याकरणस्य वैशिष्ट्यावबोधने न परिश्राम्यन्ति। तत्र केचित् तदीयसूत्ररचनापद्धतिं प्रशंसन्ति, अन्ये प्रत्याहारप्रक्रियां वैज्ञानिकीं मन्यन्ते, अपरे तदीयधातुरूपाणां प्राशस्त्यं वदन्ति, इतरे च तत्र प्राच्यभारतीयसंस्कृतिबोधकानामितिवृत्तावबोधकानामितरेषां च घटनाविशेषविज्ञापकानां शब्दानां संग्रहस्य समीचीनतामुद्घोषयन्ति। एवं पाणिनीयं व्याकरणं न केवलं परिमाणकृतमहत्त्ववशादेव प्रशस्तं मन्यते, किं च विधानकृतसौष्ठववशादपि तदुपलब्धव्याकरणेषु शिरोमणिभूतं परिगण्यते—

पाणिनीयं महत्सुविहितम् (**म० भा०** ४।२।६६)।

पाणिनितः परवर्तिकाले बहुभिराचार्यैः प्रयोजनविशेषस्य संपत्तये प्रायेण चत्वारिंशद् व्याकरणानि रचितानि। एतेषु कातन्त्र-चान्द्र-जैनेन्द्र-शाकटायन-सरस्वतीकण्ठाभरण-संक्षिप्तसार-हैम-सारस्वत-मुग्धबोध-सुपद्म-हरिनामामृत-प्रयोगरत्नमालाख्यव्याकरणानामध्ययनमध्यापनं च प्रचलितमासीत्। विश्रान्तविद्याधर-आशुबोध-दीप-बालशिक्षाप्रभृतीनां प्रायस्त्रिंशद्व्याकरणानामध्ययनादावत्यन्तं न जातः समादरः।

बालावबोधन-मलयगिरिशब्दानुशासन-हरिनामामृताख्यानि व्याकरणानि पूर्वं प्रचलितान्यपि पश्चाद् ग्रन्थरूपेणावशिष्टानि।

पाणिनिपरवर्तिषु पूर्वं प्रचलितेषु च व्याकरणेषु कातन्त्रव्याकरणस्य शब्द-साधनप्रक्रिया संक्षिप्ता सरला च प्रतिभाति। प्रक्रियालाघवदृशा मया कातन्त्रीयचतुर्दश-शतसूत्राणि (१४००) पाणिनीयसूत्रैः सह पृथक् परीक्षितानि, तस्यायमेव निष्कर्षो यल्लाघवेन शब्दसाधुत्वस्यावबोधार्थं कातन्त्राध्ययनेन महानुपकारः कश्चिज्जायेतेति।

कातन्त्रव्याकरणमिदं पाणिनिपरवर्तिषु सर्वेषु व्याकरणेषु प्राथम्यं भजते इत्यत्रास्ति सम्मतिः प्रायेण सर्वेषामेव व्याकरणशास्त्रेतिवृत्तलेखकानाम्। अत्र युधिष्ठिरमीमांसकः सुचिन्तितं स्वाभिमतमित्थं साधयितुं यतते—

"पाणिनीयं सूत्रमस्ति **सूत्राच्च कोपधात्** (पा० ४।२।६५) इति। अत्र कात्यायन-स्यैकं वार्त्तिकं विलसति **संख्याप्रकृतेरिति वक्तव्यम्**। एतेन सूत्रार्थो भवति-सूत्रवाचिनः कोपधात् संख्याप्रकृतिकाच्च शब्दादुत्पद्यमानस्य प्रत्ययस्य लुग् भवतीति। तेन अष्टकमधीयते **अष्टकाः** पाणिनीयाः, त्रिकमधीयते **त्रिकाः** काशकृत्स्नाः इति शब्दौ निष्पद्येते। अर्थाद् अष्टावध्यायाः परिमाणस्येत्यष्टकं पाणिनिकृतं व्याकरणम्, तस्माच्च सूत्रवाचिनः कोपधात् संख्याप्रकृतिकाच्चाष्टकशब्दादुत्पद्यमानस्याध्येतृ-प्रत्ययस्य लुकि सति **अष्टकाः** इति शब्दरूपं साधु भवति। एवं **त्रिकाः** इति शब्दस्यापि साधुत्वम्। त्रिकशब्दोऽपि सूत्रवाची कोपधः संख्याप्रकृतिकश्चास्ति, तेन तत उत्पद्य-मानस्याध्येतृप्रत्ययस्य लुक् प्रवर्तते। सूत्रस्यास्य प्रत्युदाहरणद्वयी महाभाष्यकारेणोप-स्थापिता-**माहावार्त्तिकाः कालापकाश्चेति**। अर्थाद् महावार्त्तिकमधीयते इत्यर्थे सत्यपि सूत्रवाचित्वे कोपधत्वे च महावार्त्तिकशब्दस्य संख्याप्रकृतिकत्वाभावादेव तत उत्पद्य-मानस्याध्येतृप्रत्ययस्य लुग् न भवति, एवं कोपधस्य कलापकशब्दस्यापि सूत्रवाचित्व-मवश्यमेव स्यात्, परं तस्य संख्याप्रकृतिकत्वाभावादेवाण्प्रत्ययस्य लुगभावे **कालापकाः** इति शब्दः सिध्यति। एवमयं सूत्रवाची कलापकशब्दः कातन्त्रापरपर्याय एवेति पाणिनिपतञ्जल्योर्मध्यकाले कातन्त्रव्याकरणस्य रचना बभूव" इति।

अस्तु मया कातन्त्रं यावदधीतं परिशीलितं च, तावताऽधिगतं वैशिष्ट्यमिह निबध्यते—

१. विविधनामकृतं वैशिष्ट्यम्

(१) कातन्त्रम्

ईषद् अल्पं संक्षिप्तं वा तन्त्रं कातन्त्रम्। ईषदर्थककुशब्दस्य 'का' आदेशः **का त्वीषदर्थेऽक्षे** (कात० १।५।२५)। तन्त्र्यन्ते व्युत्पाद्यन्ते शब्दा अनेनेति तन्त्रं व्याकरणम्।

अर्थात् संक्षिप्तं यद् व्याकरणं तदेव कातन्त्रपदवाच्यमस्ति। अधुना स्वल्पतन्त्रत्वात् कातन्त्राख्यं भविष्यतीति **अग्निपुराणम्**, संक्षेपश्च पाणिनीयव्याकरणापेक्षया पूर्ववर्तिसमस्तव्याकरणापेक्षया वा सिद्धः। कार्त्तिकेयतन्त्रम्, काशकृत्स्नतन्त्रम्, कात्यायनतन्त्रम्, कालापकतन्त्रं वा कातन्त्रमिति केषांचिन्मतिः। इह सर्वत्र आद्यस्य पदस्य प्रथमेनाक्षरेण सह तन्त्रशब्दयोजनया कातन्त्रमित्यत्र कार्त्तिकेयादितन्त्रस्य संक्षेपोऽभिप्रेयते तैस्तैर्मतवादिभिः। कातन्त्रव्याकरणमिदं कस्माच्चिद् बृहत्तन्त्राल्लघूकृतमित्यभ्युपैति दशपाद्युणादिवृत्तिकारः। कुत्सितं तन्त्रं कातन्त्रमिति ये वदन्ति ते वस्तुतो व्याकरणेन तत्रापि च कातन्त्रेण सर्वथाऽनभिज्ञा एव सन्ति।

(२) कलापं कालापं कलापकं वा

गौडदेशीयास्तिब्बतदेशीयाश्च नामभिरेभिरिदं व्याकरणं व्यवहरन्ति। कलां व्याकरणांशम्, संक्षेपम् अल्पशब्दान् वा आप्नोति व्याप्नोति अधिकरोति वा कलापम्। तदेव कालापम्। संज्ञायां कनि प्रत्यये सति कलापकम् (संज्ञायां कन्—पा० ५।३।८७)। बृहत्तन्त्रात् कला आपिबतीति कलापकः शास्त्रमिति हेमचन्द्रः। संग्रहार्थकोऽपि कलापशब्दः। अतो बहूनां व्याकरणानां संग्रहात्मकमिदं कलापव्याकरणम्। इदमप्युच्यते यत् कलापो मयूरपिच्छम्, तत्रैवास्य व्याकरणस्य सूत्रमादौ लिखितं बभूव, मयूरपिच्छस्य मध्याद् उपदेशो वाऽस्य समजनीति हेतोर्वा इदं कलापनाम्ना प्रथितमस्ति। उक्तमपि,

शंकरस्य मुखाद् वाणीं श्रुत्वा चैव षडाननः।
लिलेख शिखिनः पुच्छे कलापमिति कथ्यते॥ इति।

अथवा कलापी मयूरः स व्याकरणस्यास्य सम्प्रदाने साहाय्यमारचयामासेति कलापमस्य नाम बभूव।

(३) कौमारम्

जैनाचार्याणां केषांचिन्मतानुसारेण कुमार्या भारत्या सरस्वत्या प्रवर्तितत्वात् कौमारमित्यस्य व्याकरणस्य नामधेयम्। यथोच्यते—

ब्राह्म्या कुमार्या प्रथमं सरस्वत्याऽप्यधिष्ठितम्।
अर्हं पदं संस्मरन्त्या तत्कौमारमधीयते॥
कुमार्या अपि भारत्या अङ्गन्यासेऽप्ययं क्रमः।
अकारादिहपर्यन्तस्ततः कौमारमित्यदः॥

(द्र० कात० रूप०-ग्रन्थान्ते १९२७ ख्रीस्ताब्दे मुम्बईतः प्रकाशिते)

अन्ये भाषन्ते—कुमारेण स्वामिकार्त्तिकेयेन प्रवर्तितत्वादिदं कौमारनाम्ना व्यवह्रियते। अर्वाचीनास्तु इदं मन्यन्ते यत् कुमाराणामल्पमतीनां बालानां कृतेऽत्यन्तं हितसाधकत्वादुपकारकत्वाद् वाऽस्य कौमारमिति सार्थकं नाम। राजकुमाराणां वा इदं कौमारं तन्त्रमित्यपि मतमाद्रियते व्युत्पत्तिविचक्षणैः कैश्चित्, तेनापीदं कौमार-नाम्ना प्रसिद्धं वर्तते।

(४) शार्ववर्मिकम्

कार्त्तिकेयमाराध्य आचार्यशर्ववर्मणा प्रोक्तमिदं व्याकरणम्, तस्मादस्य शार्ववर्मिकमिति नामधेयमस्ति।

(५) दौर्गसिंहम्, दुर्गसिंहीयं वा

दुर्गसिंहेन व्याकरणस्यास्य क्वचित् परिष्कारः कृतः, वृत्ति-टीका-उणादिवृत्ति-लिङ्गानुशासन-परिभाषावृत्त्यादिभिर्वेदं परिबृंहितम्। तेनास्य दौर्गसिंहं दुर्गसिंहीयं वा नाम समादृतं वर्तते।

२. रचनाप्रयोजनस्य वैशिष्ट्यम्

सातवाहनाभिधानः (आन्ध्रप्रदेशीयः) कश्चिद् राजा एकदा स्वमहिषीभिः समं जलक्रीडायामासक्तो बभूव। बहुकालपर्यन्तं प्रवर्तमानया जलक्रीडया श्रान्ता सती काचिदेका विदुषी पत्नी तस्या राजानमाह—**मोदकं देहि देव !** इति। तस्या आवेदन-स्यायमाशय आसीद् यद् राजन् ! जलक्रीडया इदानीमहमतितरां श्रान्ता संजाताऽस्मि, अतो मयि जलवृष्टिर्न कार्येति, परं व्याकरणानभिज्ञत्वाद् राजा प्रेम्णा तस्यै बहून् मोदकान् व्यतरत्। एतेन व्याकरणानभिज्ञतां तस्य विज्ञाय विदुषी राज्ञी राजानमुप-जहास। तेनोपहासेन राजा खिन्नो लज्जितश्च बभूव। तदा स मनसि संकल्पयामास-'यावदहं व्याकरणज्ञानं न करिष्यामि तावद् निश्चिन्तो न भविष्यामि' इति। एवं मनसि संकल्प्य लज्जितो राजा राजभवने क्वचिदेकान्तस्थाने शयनमारुरोह। व्युष्टायां शर्वर्यां संजाते च प्रभाते यदा राजा राजसभायामुपस्थितो न बभूव, तदा तदीयाः सर्वे सभ्याः सचिवा अमात्याश्च चिन्तिता विस्मिताश्चाभूवन्। राजपण्डितो गुणाढ्यः आचार्यः शर्ववर्मा च राजान्तिकं जग्मतुः। तत्र यत्नेन राज्ञोऽभिप्रायं विज्ञाय राजपण्डितो गुणाढ्यो राजानमुवाच—यद्यपि व्याकरणं द्वादशभिर्वर्षैः श्रूयते तथाप्यहं तथाविधं यत्नं करिष्यामि तादृशं ग्रन्थं वा रचयिष्यामि, यस्याध्ययनेन षड्भिरेव वर्षैः कश्चिद् वैयाकरणो भवेदिति। गुणाढ्यस्य वचनमिदमसहमान आचार्यः शर्ववर्मा अवोचद् यदहं तु तादृशं ग्रन्थं रचयितुं समर्थोऽस्मि यस्याध्ययनेन षड्भिर्मासैरेव

व्याकरणज्ञानं कर्तुं शक्यते। 'यदि त्वमेवंविधे कर्मणि सफलो भवेस्तदाऽहं संस्कृतं प्राकृतं च परिहाय भूतभाषामेव काञ्चिदाश्रयिष्यामि' इति गुणाढ्यः सामर्षमाह।

अस्तु, राज्ञः समक्षं तादृशं ग्रन्थं रचयितुं प्रतिज्ञाय शर्ववर्मा कुमारकार्त्तिकेय-सकाशाद् व्याकरणमधिगन्तुं तदीये कस्मिंश्चिद् मन्दिरे रात्रौ जगाम। तत्र गर्भगृहं प्रविष्टः स कुमारमाराधयामास। तदाराधनया प्रसन्नो भगवान् कार्त्तिकेयस्तस्मै स्वव्याकरणस्य प्रथमं सूत्रमुपदिदेश—**सिद्धो वर्णसमाम्नायः** इति। तदनन्तरमनादिष्ट एव आचार्यः शर्ववर्मा द्वितीयं सूत्रमुच्चारयामास—**तत्र चतुर्दशादौ स्वराः** इति। अनेन आचरणेन अप्रसन्नो भूत्वा कुमारकार्त्तिकेयस्तस्मै शापं व्यसृजत—अनादिष्टेनैव त्वया द्वितीयं सूत्रमुच्चारितम्, अतस्त्वदीयं व्याकरणं न भविष्यति पाणिनीयोपमर्दकम्, किं च **स्वल्पतन्त्रत्वात् कातन्त्राख्यं भविष्यति** इति। एवमाचार्येण शर्ववर्मणा कुमार-कार्त्तिकेयसकाशाद् व्याकरणमधिगतम्। कलापचन्द्रकारः कविराजसुषेणवैद्यभूषणो रचनाप्रेरकं वृत्तमित्थं संघटितवान्—

"राजा कश्चिन्महिष्या सह सलिलगतः खेलयन् पाणितोयैः
सिञ्चस्तां व्याहृतोऽसावतिसलिलतया मोदकं देहि देव!।
मूर्खत्वात्तन्न बुद्ध्वा स्वरघटितपदं मोदकस्तेन दत्तो
राज्ञी प्राज्ञी ततः सा नृपतिमपि पतिं मूर्खमेनं जगर्ह॥

पुरा किल श्रीसातवाहनाभिधानं वसुधाधिपं झटिति व्युत्पादयितुं प्रतिश्रुतवता भगवता शर्ववर्माचार्येण कुमाराभिधानो भगवान् भवानीसुतस्तपसा समाराधितः, स च तदाराधनाधीनतामुपगतः सन् निजव्याकरणज्ञानमाविर्भावयितुं पद्यपादरूपं सूत्र-मिदमादिदेश—**सिद्धो वर्णसमाम्नायः**" इति।

आचार्यशशिदेवविरचिते **व्याख्यानप्रक्रियाख्ये** लघुग्रन्थे कलापव्याकरणस्य रचनायाः प्रयोजनमेवमुक्तमस्ति—शास्त्रान्तररतानां वैदिकानाम्, परनिन्दाप्रसक्तचेतसा-मैश्वर्याभिभूतानां धनिनाम्, आलस्ययुतानां यूनाम्, लोभादिग्रस्तानां वणिजाम्, लोक-यात्रादिषु व्यापृतानामपि मनुजानां शब्दसाधुत्वप्रक्रियाज्ञानं क्षिप्रं भवेदित्येतदर्थं कलाप-व्याकरणं रचितम्। उक्तं च तत्र—

छान्दसाः स्वल्पमतयः शास्त्रान्तररताश्च ये
ईश्वरा वाच्यनिरतास्तथालस्ययुताश्च ये।
वणिजस्तृष्णादिसंसक्ता लोकयात्रादिषु स्थिताः
तेषां क्षिप्रं प्रबोधार्थमनेकार्थं कलापकम्॥ इति।

३. वेदाङ्गत्वाङ्गीकारे वैशिष्ट्यम्

बहवो वैयाकरणकल्पा एवं वदन्ति यद् व्याकरणस्य वेदाङ्गत्वाद् यस्मिन् व्याकरणे वैदिकशब्दानां साधुत्वस्यान्वाख्यानाय सूत्राणि सन्ति, तस्य तु वेदाङ्गत्वमसंदिग्धमेवास्ति, परं यस्मिन् व्याकरणे केवलं लौकिकशब्दानामेव साधनाय सूत्राणि कृतानि, वैदिकशब्दसाधुत्वं च न दर्शितम्, तन्नास्ति वेदाङ्गम्। वेदाङ्गत्वाभावात्तस्य पुण्यजनकत्वेऽपि संदेहः कश्चिद् वर्तते इत्यादि।

अत्र कातन्त्रव्याख्याकाराणामभिमतमिदमवधेयमस्ति—"वेदेऽपि बहवस्तथाविधा एव शब्दाः प्रयुक्ताः सन्ति, ये लोकेऽपि प्रयुज्यन्ते। अल्पीयांस एव शब्दास्तथाविधाः 'देवासः-जभार-गृभ्णामि' प्रभृतयो वर्तन्ते, येषां केवलं वेदे एव प्रयोगो दृश्यते न तु लोके। एवं वेदेऽपि प्रयुक्तानां बहूनां लौकिकशब्दानामेव यस्मिन् साधुत्वान्वाख्यानं वर्तते तदपि वेदाङ्गमेव, नास्ति तस्य वेदाङ्गत्वाभावः। एतेन लौकिकशब्दसाधनपरस्य कातन्त्रव्याकरणस्यान्येषां च तथाविधानां व्याकरणानां वेदाङ्गत्वमेव संपद्यते।

अपि च वैदिकसम्प्रदायस्य वैदिकपरम्पराया वाऽविच्छिन्नत्वादेवाल्पीयसां वेदे एव प्रयुक्तानां शब्दानां साधुत्वज्ञानं शिष्टजनसकाशात् कर्तुं शक्यते एव, तदर्थं सूत्रं शास्त्रं वा नास्त्यावश्यकम्"।

अत्रेदमाशङ्क्यते—यथा वैदिकशब्दानां साधुत्वज्ञानाय शास्त्रं नापेक्ष्यते, तथैव लौकिकशब्दानामपि साधुत्वं शिष्टजनसकाशात् कर्तुं शक्यते इति कृत्वा तेषामपि साधुत्ववोधाय सूत्रप्रणयनं नावश्यकमिति। अत्रेदमवगन्तव्यम्—लौकिकशब्दास्त्वनन्ताः सन्ति, तेषां साधुत्ववोधो लक्षणमन्तरा न संभाव्यते। कृतेऽपि लक्षणे एकस्मिन् कस्मिंश्चिदपि व्याकरणे सर्वे शब्दा न साध्यन्ते, का कथा पुनर्लक्षणाभावे लौकिकशब्दसाधुत्ववोधस्य। अतो लौकिकशब्दानां लाघवेन साधुत्ववोधनाय शास्त्रं करणीयमेवेति।

कातन्त्रे वैदिकशब्दाः कथन्न व्याख्यातास्तेन तेषां साधुत्वं कथमवगन्तव्यमिति समाधानाय कातन्त्रवृत्तिकारेण दुर्गसिंहेनोक्तं **लोकोपचाराद् ग्रहणसिद्धिः** (कात० १।१।२३) इति सूत्रव्याख्यानावसरे—

वैदिका लौकिकज्ञैश्च ये यथोक्तास्तथैव ते।
निर्णीतार्थास्तु विज्ञेया लोकात् तेषामसंग्रहः॥ इति।

४. सूत्रशैल्या वैशिष्ट्यम्

(१) पाणिनीये कार्यिणो निर्देशः षष्ठ्यन्तः, कार्यस्य च निर्देशः प्रथमान्तो वर्तते। पूर्वाचार्याः कार्यिणं प्रथमान्तम्, कार्यं च द्वितीयान्तमेव निर्दिष्टवन्त इति बहुभिराचार्यैस्तत्र तत्रोच्यते। इमामेव पद्धतिं कातन्त्रकारोऽप्यनुससार। अत एव **समानः सवर्णे दीर्घीभवति परश्च लोपम्** (२।१।१) इति सूत्रे कार्यिणः समानस्य प्रथमया निर्देशः, लोपमिति कार्यस्य च द्वितीयया निर्देशस्तेन कृतः। एवमेव **इवर्णो यमसवर्णे न च परो लोप्यः, एदोत्परः पदान्ते लोपमकारः, अकारो दीर्घं घोषवति** (१।२।८; १७, २।१।१४) इत्यादिसूत्रेष्वपि पद्धतिरियं द्रष्टव्या।

(२) स्पष्टप्रतिपादनाय एकाराद्या बहव आदेशाः पृथक् सूत्रेषूपनिबध्यन्ते, न तु पाणिनीयव्याकरणवदेकस्मिन्नेव सूत्रे। यथा पाणिनीये एकाराद्यादेशार्थम् **आद् गुणः** (६।१।८७) इत्येकमेव सूत्रम्। कातन्त्रे तु **अवर्ण इवर्णे ए, उवर्णे ओ, ऋवर्णे अर्, लृवर्णे अल्** (१।२।२-५) इति सूत्रचतुष्टयं कृतम्। एवमेव **एचोऽयवायावः** (६।१।७८) इति पाणिनीयसूत्रविहितकार्यार्थं कातन्त्रे चत्वारि सूत्राणि कृतानि—**ए अय्, ऐ आय्, ओ अव्, औ आव्** (१।२।१२-१५) इत्येतानि।

(३) व्याकरणेऽस्मिन् इत्संज्ञाया अभावाद् उकारादिघटितानामागमानां कुत्र योजना भवेदित्येतदर्थमत्र उदनुबन्ध आगमः स्वरादन्त्यात् परो विहितः—**आगम उदनुबन्धः स्वरादन्त्यात् परः** (२।१।६) इति, तदनुसारेण 'मु-तु-नु' इत्येते आगमाः स्वरादन्त्यात् परा भवन्ति—**अकारादसंबुद्धौ मुश्च, अन्यादेस्तु तुः, धुट्स्वराद् घुटि नुः** (२।२।७, ८, ११) एते एव आगमाः **तृतीयादौ तु परादिः** (२।१।७) इति सूत्रनिर्देशानुसारेण परादयो भवन्ति।

(४) अर्थसमाप्त्यर्थं सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्त्यते। यथा **उवर्णे ओ, ऋवर्णे अर्** (२।२।३, ४) इत्यादौ कार्यी अवर्णो न दृश्यते, स च पूर्ववर्तिनः सूत्रात् **अवर्ण इवर्णे ए** (२।२।२) इत्येतस्मादनुवर्त्यते, अथ च ओकाराद्या आदेशा विधीयन्ते। एवमन्यत्रापि विज्ञेयम्।

(५) व्याकरणेऽस्मिन् प्रत्याहाराभावाद् अचो बोधाय स्वरपदम्, हलश्च बोधाय व्यञ्जनपदमुपादीयते वर्णविशेषा वा पठ्यन्ते। यथा **व्यञ्जने चैषां निः** (२।२।३८), **स्वरेऽक्षरविपर्ययः** (२।५।२३) इत्यादौ। एवं पाणिनीयझल्प्रत्याहारस्यावबोधाय कातन्त्रे 'धुट्'—संज्ञाशब्दः प्रयुज्यते। एवमन्यत्रापि।

(६) पाणिनीयवैदिकप्रकरणे स्वरार्थं येऽनुबन्धा विहितास्ते अत्र वैदिकप्रकरणाभावान्न योज्यन्ते। यथा पाणिनीये अच्प्रत्ययस्य चकारश्चित्स्वरार्थः तिप्-

प्रत्ययस्य पकारश्च पित्स्वरार्थः पठ्यते। परं कातन्त्रे तदर्थम् 'अ-ति' इत्येतादृशा एव प्रत्ययाः पठिताः सन्ति।

५. वर्णसमाम्नायकृतं लोकव्यवहारसमादरकृतं च वैशिष्ट्यम्

व्याकरणस्मृतिः प्रयोगमूलाऽस्तीत्यस्माद् हेतोर्लोकव्यवहारः सर्वत्रैव व्याकरणशास्त्रे समाद्रियते। न केवलं पाणिनीयव्याख्याकारा एव तत्र तत्र व्याचक्षते-**कारकाणि विवक्षातो भवन्ति, लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य, अत्र समासो न भवत्यनभिधानात्** इत्यादि। स्वयं पाणिनिरपि **तदशिष्यं संज्ञाप्रमाणत्वात्, प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्, कालोपसर्जने च तुल्यम्** (अ० १।२।५३, ५६-५७) इत्यादिसूत्रवचनैर्लोकव्यवहारमेव प्रमाणकोटौ व्यवस्थापयति।

अपि च येषु शब्देषु वर्णागम-वर्णविपर्यय-वर्णविकृति-वर्णनाशादीनि कार्याणि दृश्यन्ते तेषां शब्दानां लोक (शिष्ट)—व्यवहारानुसारमेव साधुत्वमवधारणीयमिति स उपदिशति—**पृषोदरादीनि यथोपदिष्टम्** (पां० ६।३।१०९) इति। वर्णागमादिकार्याणां निदर्शनान्येवमुच्यन्ते—

भवेद् वर्णागमाद् हंसः सिंहो वर्णविपर्ययात्।
गूढोऽऽत्मा वर्णविकृतेर्वर्णनाशात् पृषोदरम्॥ इत्यादीनि।

कातन्त्रे तु लोकव्यवहारः पाणिनीयादप्याधिक्येन समाद्रियते। तदीयं प्रथमं सूत्रं वर्तते—सिद्धो **वर्णसमाम्नाय** इति। अर्थाद् वर्णानां पाठक्रमः कातन्त्रे लोकप्रसिद्ध एव गृह्यते। अत एवात्र स्वरेषु दीर्घस्वरवर्णा अपि पठिताः सन्ति। एकारादनन्तरमैकारः, ओकारः, औकारश्च वर्णाः पठ्यन्ते। पाणिनीये दीर्घस्वरा न पठिताः, एकारादनन्तरमोकारस्ततः 'ऐ—औ' इति वर्णौ पठ्येते। स्वरवर्णानन्तरमनुस्वार-विसर्ग-जिह्वामूलीय-उपध्मानीयाः पठिताः, अत एवैषामयोगवाहत्वमत्र नास्ति। पाणिनीये तु पाठाभावादेते वर्णा अयोगवाहसंज्ञकाः स्वीक्रियन्ते। व्यञ्जनवर्णेषु कातन्त्रे कादिहान्तं क्रमेण वर्णानां पाठः। हकारादनन्तरं 'क्ष' वर्णोऽपि पठितः, 'व्यञ्जनद्वयसंयोगेनोच्चारणे कश्चिद् विलक्षणो वर्ण उत्पद्यते' इत्येतस्य निदर्शनाय। पाणिनीये तु प्रायेण व्यञ्जनवर्णानां पाठे व्यत्यास एव लक्ष्यते, तत्रापि च हकारस्य द्विः पाठो वर्तते। एवं कातन्त्रस्य वङ्गीयसंस्करणे एकोनपञ्चाशद् वर्णाः सन्ति, काश्मीरकसंस्करणे च द्विपञ्चाशद् वर्णाः।

लोकव्यवहारप्रामाण्यस्य साधकमपरमप्येकं सूत्रं वर्तते—**लोकोपचाराद् ग्रहणसिद्धिः** (१।१।२३) इति। उपचारो व्यवहारः। गृह्यतेऽर्थोऽनेनेति ग्रहणः शब्दः, तेन लोकव्यवहारात् शब्दसिद्धिर्वेदितव्या इत्यर्थः। केषां शब्दानाम् ? अत्रानुक्तानां वैदिकानां केषांचिल्लौकिकानाञ्चापि शब्दानाम्।

सूत्रे लौकिकशब्दसिद्धावयं विशेषो वर्तते यत् क्वचिद् 'वा'—पदस्य, क्वचिद् 'अपि' शब्दस्य, क्वचिच्चान्येषामपि सूत्रपठितानां शब्दानां सूत्राणां वाऽनुवृत्त्या बहूनां शब्दानां साधुत्वमास्थीयते। ये च शब्दा उक्तविधिनापि साधयितुं न शक्यन्ते, तेषां साधुत्वं शिष्टव्यवहारेणावगन्तव्यम्। यथोक्तं कलापचन्द्रकारेण कविराजसुपेणविद्याभूषणेन—

वाशब्दैश्चापिशब्दैर्वा शब्दानां (सूत्राणां) चालनैस्तथा।
एभिर्येऽत्र न सिध्यन्ति ते साध्या लोकसम्मताः॥ इति।

(क० च० १।१।२३)

६. लाघवप्रयुक्तं वैशिष्ट्यम्

लाघवं द्विविधं भवति शब्दकृतमर्थकृतं च। शब्दकृतलाघवेऽर्थबोधो झटिति विलम्बेन वा भवेदिति न चिन्त्यते, किं च शब्दानामल्पत्वमेव चिन्त्यते। अल्पशब्दानां प्रयोगेण प्रायोऽर्थबोधे सौकर्यं लाघवं वा न भवति। उच्यते च व्याख्याकारैर्यद् वृक्षशब्दस्य प्रयोगे वृशब्दं क्षशब्दं वा व्यवहरतो न किञ्चिद् वैदग्ध्यं प्रस्फुरति। अर्थलाघवे तु अर्थबोधो झटिति भवेदिति चिन्त्यते, तत्र शब्दाधिक्यचिन्ता न भवति। अत एव कातन्त्रे स्वर-व्यञ्जन-अद्यतनी - श्वस्तनी - भविष्यन्ती-क्रियातिपत्तिप्रभृतयो महत्यः संज्ञाः प्रणीताः, न तु अच्-हल्-लट्-लङ्सदृशा अल्पाक्षरा एव पाणिनीयव्याकरणवत्। परं कातन्त्रे प्रायेण सर्वे संज्ञाशब्दा अन्वर्था एव सन्ति। अतस्तेषामर्थबोधे महल्लाघवमापद्यते। पाणिनीये शब्दलाघवं प्रत्याहारप्रयोगे विशेषतो दृश्यते, कातन्त्रे च प्रत्याहाराणामभाव एव वर्तते।

पाणिनीये तिङ्संज्ञका अष्टादश प्रत्ययाः पठितास्तत्रादौ नव परस्मैपदिनः ततश्च नव आत्मनेपदिनः सन्ति, तेषां लकारभेदेन णलाद्यादेशविधायकानि बहूनि सूत्राणि पाणिनिना कृतानि। कातन्त्रे अशीत्यधिकशतमिताः प्रत्ययाः (१८०) एव तादृशाः पठिता येषां कालविशेषबोधनाय आदेशविधानं प्रायेण नापेक्ष्यते। अतस्तथा विधसूत्राणामप्यभाव एव कातन्त्रे। एतदपि अर्थलाघवस्यैव निदर्शनम्।

एतदर्थंलाघवादिकं विशेषाधायकं यद् वस्तु पाणिनीयव्याकरणभिन्नं कातन्त्रे सन्निहितं तत् कुतः समादृतमिति विषये बहवो वदन्ति यत् कातन्त्रव्याकरणमैन्द्र-परम्परामनुसरतीत्यादि। परमत्र ये हेतवो दर्श्यन्ते तेषां परिशीलनेनेदमित्थंरूपेण वक्तुं न शक्यते। इदं सुनिश्चितं यत् पाणिनीयव्याकरणादिदं कातन्त्रं सर्वथा भिन्न-मेवास्ति। जोधपुरतः प्रकाशितस्य **बालशिक्षाख्य**व्याकरणस्य भूमिकायां डा० फतहसिंहमहोदयः, संस्कृतव्याकरणशास्त्रेतिहासे युधिष्ठिरमीमांसकश्च काशकृत्स्न-तन्त्रस्य संक्षेपरूपं कातन्त्रं संसाधयतः। तत्र हेतुरुच्यतेऽध्यायत्रितयस्य साम्य-मुभयत्र।

७. शब्दसाधनप्रक्रियाया वैशिष्ट्यम्

(१) सवर्णदीर्घविधिः

'देव + अरिः, भानु + उदयः' इत्यादिशब्दरूपावस्थायां पाणिनिः **एकः पूर्वपरयोः** (६।१।८४) इति सूत्राधिकारे अकः सवर्णे दीर्घः (पा० ६।१।१०१) इति सूत्रेण पूर्व-परयोरिवर्णयोरुवर्णयोश्च स्थाने क्रमेण दीर्घाकाररूपं दीर्घोकाररूपं चादेशं विदधाति। तेन 'देवारिः, भानूदयः' इत्यादीनि शब्दरूपाणि सिध्यन्ति। कातन्त्रे तु **समानः सवर्णे दीर्घीभवति परश्च लोपम्** (१।२।१) इति सूत्रेण पूर्ववर्ती समानसंज्ञक एक एव वर्णो दीर्घाकारादिरूपमाप्नोति; परवर्तिनश्चाकारादयो वर्णा लुप्यन्ते।

एवं कार्यसंख्यायां साम्येऽपि प्रायेणोभयत्र कातन्त्रे यदेकेनैव सूत्रेण किं चैक-स्यैव वर्णस्य स्थाने एक आदेशो विधीयते, तेन कातन्त्रीयप्रक्रियायां किञ्चिल्लाघव-मेव प्रतीयते।

(२) गुणविधिः

'रमा + ईशः, गङ्गा + उदकम्' इत्यादिशब्दरूपावस्थायां पाणिनिः पूर्व-परयोर्वर्णयोः स्थाने एकारमोकारं च आदेशं करोति, तेन च रमेशः, गङ्गोदक-मित्यादयः शब्दा निष्पन्ना भवन्ति (आद् गुणः ६।१।८७)। कातन्त्रकारस्तु पूर्ववर्तिनो-ऽवर्णस्यैव एकाराद्यादेशान् विदधाति, परवर्तिनो वर्णांश्च लोपयति। एतत्कार्यार्थं तत्र चत्वारि सूत्राणि सन्ति—**अवर्णं इवर्णे ए, उवर्णे ओ, ऋवर्णे अर्, लृवर्णे अल्** (१।२।२-५) इति।

एवं कातन्त्रे एतद्विध्यर्थं प्रणीतेन सूत्रचतुष्टयेन यद्यपि शब्दगौरवं प्रतीयते, तथापि पाणिनीये अच्पदानुवृत्ति-एकादेशाधिकारप्रवृत्ति-सावर्ण्यविधिचिन्ताप्रभृतिकार्यं ततोऽपि गुरुतरं प्रतिभातीति कातन्त्रप्रक्रिया सरला, सुबोधा चेत्यवगन्तव्यम्।

(३) यण्विधिः

'दधि + अत्र, मधु + अत्र' इत्यादिशब्दरूपावस्थायां पाणिनिः **इको यणचि** (६।१।७७) इत्येकेनैव सूत्रेण इकारस्य यकारादेशम्, उकारस्य च वकारादेशं करोति, तेन च 'दध्यत्र-मध्वत्र'-प्रभृतयः शब्दा निष्पद्यन्ते। कातन्त्रकारस्तु चत्वारि सूत्राण्यत्र पठति—**इवर्णो यमसवर्णे न च परो लोप्यः, वमुवर्णः, रमृवर्णः, लम् लृवर्णः** (१।२।८-११) इति।

एतेन कातन्त्रे शब्दगौरवप्रतीतौ सत्यामपि, पाणिनीये इक्—यण्प्रत्याहारज्ञानम्, इकः षट्षष्टिमात्राणां यणश्च सप्तमात्राणामादेशविधौ वैषम्यविचारः, **यथासंख्यमनुदेशः समानाम्** (१।३।१०) इति सूत्रप्रवृत्तिश्चेत्येतत्कार्यगौरवापेक्षया कातन्त्रीयसूत्रनिर्देशे लाघवं स्पष्टमेव। एवं पाणिनीये शब्दसंक्षेपेण अर्थबोधे गौरवमेव संनिहितं दृश्यते, कातन्त्रे च शब्दाधिक्येऽपि अर्थबोधे लाघवमेवास्ति।

(४) पूर्वरूपम्

'ते + अत्र, पटो + अत्र' इत्यादिशब्दरूपावस्थायां पाणिनिः **एकः पूर्वपरयोः** (६।१।८४) इति सूत्राधिकारे **एङः पदान्तादति** (६।१।१०९) इत्यनेन अकारैकारयोः पूर्वरूपं विदधाति। तेन अकारः एकाररूपम् ओकाररूपं वा आप्नोति, ततश्च 'तेऽत्र, पटोऽत्र'-प्रभतीनि शब्दरूपाणि सिध्यन्ति। अत्र अकारस्य परिज्ञानार्थमर्वाचीनैः रोमनलिपिचिह्नं ऽ इति योज्यते। कातन्त्रे तु **एदोत्परः पदान्ते लोपमकारः** (१।२।१७) इत्यनेनाकारस्य लोपः क्रियते। एवं पाणिनीयपूर्वरूपापेक्षया कातन्त्रीयलोपनिर्देशे ज्ञानकृतं लाघवमेव वर्तते।

(५) द्वित्वविधिः

'क्रुङ् + अत्र, सुगण् + अत्र, पचन् + अत्र' इत्यादिशब्दरूपावस्थायां पाणिनीये **ङमो ह्रस्वादचि ङमुण् नित्यम्** (८।३।३२) इत्यनेन क्रमशः ङुट्, णुट्, नुट् चेत्येते आगमा विधीयन्ते। ते टिदागमाः **आद्यन्तौ टकितौ** (१।१।४६) इति परिभाषयाऽचः आदौ प्रवर्तन्ते। अतः 'क्रुङ्ङत्र, सुगण्णत्र, पचन्नत्र' इत्यादीनि शब्दरूपाणि साधूनि भवन्ति। कातन्त्रे तु **ङणनाः ह्रस्वोपधाः स्वरे द्विः** (१।४।७) इत्यनेन सूत्रेण 'ङ्-ण्-न्' वर्णानां द्वित्वे सति उक्तशब्दरूपसिद्धिर्भवति। एतेन कातन्त्रप्रक्रियायां लाघवं सुखेनार्थावबोधश्च भवति।

(६) शकारादेशः

'भवान् + चरति, भवान् + छादयति' इत्यादिशब्दरूपावस्थायां पाणिनीय-

प्रक्रियानुसारेण नकारस्य रुत्वम्, रोर्विसर्गः, तस्य सकारादेशः, तस्य च श्चुत्वेन शकारादेशो भवति, ततः अनुनासिकेऽनुस्वारे च कृते 'भवांश्चरति, भवांश्छादयति' इत्यादिशब्दाः साधवो भवन्ति । कातन्त्रे **नोऽन्तश्चछयोः शकारमनुस्वारपूर्वम्** (१।४।८) इत्येकेनैव सूत्रेण नकारस्यानुस्वारपूर्वः शकारादेशः प्रवर्तते, तेन च उक्त-रूपसाधुत्वमवसीयते ।

एतेन लाघवप्रियः कश्चिदपि धीमान् पाणिनिदर्शितां महतीं प्रक्रियामवश्यमेव दुरूहां दुःखकरीं चाभ्युपेयात्, तदपेक्षया कातन्त्रप्रक्रिया सरलतरा, लाघवसम्मता चास्ति ।

(७) ङे-प्रभृतिप्रत्ययानां यै-इत्याद्यादेशाः

रमायै, रमायाः, रमायामित्यादिशब्दरूपसिद्धये पाणिनी रमाशब्दात् परतो ङेप्रभृतिप्रत्ययानां याडागमं ततश्च आकारैकारयोः स्थाने वृद्धचेकादेशं करोति—**याडापः, वृद्धिरेचि** (अ० ७।३।११३; ६।१।८८)। कातन्त्रकारस्तु **ङवन्ति यै-यास्-यास्-याम्** (२।१।४२) इत्यनेन ङेप्रत्ययस्य 'यै' आदेशम्, ङसिङसोश्च यासादेशम्, ङेश्च यामादेश-मेव कृत्वा उक्तशब्दान् साधयति । एतेन कातन्त्रीयप्रक्रियायामापतितं लाघवं कमध्येतृ-वर्गं न मोदयेत् ?

(८) स्वरादिधातूनामादिवृद्धिः

'ऐत्, ऐधत' इत्यादौ पाणिनिः **आडजादीनाम्** (६।४।७२) इत्यनेन आडागमं ततश्च वृद्धिं करोति । कातन्त्रकारस्तु **स्वरादीनां वृद्धिरादेः** (३।८।१७) इत्यनेन स्वरादिधातूनामादिवृद्धिं विधायैव 'ऐत्, ऐधत' इत्यादिशब्दरूपाणि साधयति । एवं पाणिनीय-आडागमवृद्ध्यपेक्षया इकार-एकारादेर्वृद्धिविधानरूपा कातन्त्रीयप्रक्रियैव लाघवमातनोति ।

एवंविधायाः कातन्त्रीयप्रक्रियायाः समीक्षणेनायमेव निष्कर्षः समुदेति यल्लाघवेन शब्दसाधुत्वप्रक्रियाया अवबोधाय कातन्त्रव्याकरणस्याध्ययनम् महते उपकाराय कल्पेत ।

८. व्यापकप्रचारस्य वैशिष्ट्यम्

कातन्त्रव्याकरणस्य प्रचारः सीमावर्तिषु प्रदेशेषु प्रामुख्येण समभूत् । अङ्ग-वङ्गकलिङ्गकश्मीरराजस्थानादिप्रदेशा अस्य प्रयोगभूमिः । अस्यानुकृतौ पाणिने-

रष्टाध्यायीसूत्राणि बौद्धेन सूरिणा धर्मकीर्तिना प्रक्रियात्वेन व्यवस्थापितानि रूपावतार इति ग्रन्थरचनया। परम्परेयं यीशोः षोडशशताब्दीं यावदविच्छिन्ना लक्ष्यते। पाणिनीयव्याकरणं प्रक्रियाग्रन्थानामवतारणान्मन्दप्रचारं संवृत्तं कातन्त्रव्याकरणमिदमिति संभाव्यते।

भारतवर्षस्य चतुर्दिक्षु वर्तमानेषु कातन्त्रस्याध्ययनाध्यापनादिकं जातमिति मया तं तं प्रदेशमुपस्थाय अवगतम्। भारतस्य पूर्वस्यां दिशि वर्तमानयोर्वङ्गोत्कलप्रदेशयोः, उत्तरस्यां कश्मीरप्रदेशे, पश्चिमायां राजस्थानगुर्जरप्रदेशयोः, दक्षिणस्यां च आन्ध्रमद्रासादिप्रदेशेषु व्याकरणमिदं पर्याप्तं प्रचलितमासीत्। विहाय दक्षिणप्रदेशान् एतेषु स्थानेषु स्वयमेव गत्वा मयाऽधिकारिभिर्विद्वद्भिस्तथा श्रुतम्।

भारताद् बहिः तिब्बत-श्रीलङ्कादिदेशेष्वपि व्याकरणस्यास्य प्रचारो बभूवेति बहुभिरितिवृत्तवचनैर्विज्ञायते।

९. विपुलवाङ्मयस्य वैशिष्ट्यम्

कातन्त्रव्याकरणस्य विपुलं वाङ्मयं शारदा-वङ्ग-उत्कल-ग्रन्थ-देवनागराद्यक्षरैर्निबद्धं हस्तलेखेषु समुपलभ्यते। वङ्गाक्षरेषु नागराक्षरेषु च केचिद् मुद्रिता अपि ग्रन्थाः सन्ति, परं धातु-गण-उणादि-लिङ्गानुशासन-परिशिष्ट-परिभाषा-शिक्षादिसूत्राणि प्रायेण विविधलिपिमयेषु हस्तलेखेष्वेव विकीर्णानीति तानि महता आयासेनैव लब्धुं शक्यन्ते, तत्रापि च बहुत्र पाठविसंवादोऽपि वर्तते, येन ग्रन्थकाराभिप्रायपरिज्ञानं दुष्करमेव प्रतिभाति। तत्समाधानार्थं प्रयत्नविशेषेण मुद्रितान् हस्तलिखितांश्च ग्रन्थान् समधीत्य शुद्धपाठनिश्चयपुरस्सरं धातुपाठादिकं मया पृथक् संगृहीतमस्ति।

साम्प्रतं कातन्त्रस्योपलब्धं संस्करणं दुर्गसिंहेन परिष्कृतं प्रतिभाति। वररुचिना कात्यायनेन शर्ववर्मप्रणीतानां दुर्घटनाम्नी, स्वप्रणीतकृत्सूत्राणां च चैत्रकूटीनाम्नी वृत्तिः प्रणीता आसीद् या साम्प्रतं नोपलभ्यते। काश्मीरका राजस्थानीयाश्चानेके कातन्त्रस्य व्याख्यानग्रन्था बालबोधिन्यादयः शारदाक्षरेषु नागराक्षरेषु च निबद्धा बालानामेव कृते प्रायेणोपयोगिनः सन्ति, तदुद्देश्येनैव आचार्यैस्तत्तद्ग्रन्थानां प्रणीतत्वात्। शेषांशपूरणाय कातन्त्रपरिशिष्टकातन्त्रोत्तरादयो ग्रन्थाः पश्चादाचार्यैर्विरचिताः। अस्य व्याकरणस्य कातन्त्रमन्त्रप्रकाश—कातन्त्रविभ्रमादयः केचिद् ग्रन्था अवश्यं मननीयं वैशिष्ट्यमापादयन्ति।

वङ्गीयकातन्त्रवाङ्मये सप्तविंशतिः, उत्कलप्रदेशीयकातन्त्रवाङ्मये षट्, काश्मीरके कातन्त्रवाङ्मये सप्त, राजस्थानीय-कातन्त्रवाङ्मये षोडशग्रन्था हस्तलिखिता मुद्रिता वा प्राप्ताः सन्ति। तिब्बतीभाषायामुपनिबद्धाश्चत्वारो ग्रन्था डॉ० ए० सी० बर्नेलमहोदयेन The Aindra School of Sanskrit grammarians (पृ० ५६) ग्रन्थे उद्धृताः।

दाक्षिणात्यकातन्त्रवाङ्मयेऽपि सन्ति बहवो ग्रन्था उद्धृताः, परं ते तमिल—तेलुगुप्रभृतिलिपिनिबद्धा मया न समधीता इति तत्संख्यावसायो न क्रियते। तमिल-भाषाव्याकरणस्य तोलकाप्पियम् इत्याख्यस्य पालिभाषायाः कच्चायनव्याकरणस्य च संबन्धः कातन्त्रव्याकरणेन सह पर्याप्तं वर्तते।

व्याकरणस्यास्य बहूनि मतानि वचनानि च कलापदीपिका - क्षीरतरङ्गिणी-माधवीयधातुवृत्ति - पुरुषकार-प्रौढमनोरमा - शब्दशक्तिप्रकाशिका - शब्दरूपकल्पद्रुम-रत्नबोध - दुर्घटवृत्ति - पदचन्द्रिका - मुग्धबोधटीका - व्याख्यानप्रक्रियाप्रभृतिग्रन्थेषु स्मृतानि।

व्याकरणस्यास्य मुद्रितानां ग्रन्थानां परिचयः

१.	कातन्त्रविभ्रमावचूर्णिः	वि० अ० १६८४ जैनबन्धुयन्त्रालयः, इन्दौर।
२.	आख्यानमञ्जरी	बं० अ० १३१७ गोवर्धनयन्त्रम्, कलिकाता।
३.	कलापचन्द्रः	बं० अ० १३१७ आदि, गोवर्धयन्त्रादि, कलिकाता।
४.	कलापतत्त्वार्णवः	बं० अ० १३३२ संस्कृतविद्यालयः, कलिकाता।
५.	कलापतन्त्रतत्त्वबोधिनी	बं० अ० १३३२ संस्कृतविद्यालयः, कलिकाता।
६.	कातन्त्रगणमाला	बङ्गाक्षरेषु मुद्रिता, कलिकाता।
७.	कातन्त्रच्छन्दःप्रक्रिया	खि० अ० १८६६ पीपुल्स प्रेस, कलिकाता।
८.	कातन्त्रदुर्गपरिभाषावृत्तिः	खि० अ० १६६७ भ० ओ० रि० इ०, पूना।
९.	कातन्त्रधातुपाठः	खि० अ० १८३५ वङ्गाक्षरेषु मुद्रितः।
१०.	कातन्त्रपरिभाषासूत्रम्	खि० अ० १६६७ भ० ओ० रि० इ०, पूना।
११.	कातन्त्रपरिशिष्टप्रबोधः	श० अ० १८३३ संस्कृतविद्यालयः, कलिकाता।
१२.	कातन्त्रपरिशिष्टम्	श० अ० १८३३ संस्कृतविद्यालयः, कलिकाता।
१३.	कातन्त्रप्रदीपः	वङ्गाक्षरेषु कारकीयांशः कश्चिन्मुद्रितः।
१४.	कातन्त्रव्याकरणम्	१८७६ एशियाटिक सोसाइटी आफ बङ्गाल।
१५.	कातन्त्ररूपमाला	वि० अ० १६५२ निर्णयसागरयन्त्रालयः, बम्बई।

वीरनिर्वाण सं० २४८१, वीर प्रेस, मनिहारों का रास्ता, जयपुर।

१६. कातन्त्रलिङ्गानुशासनम्	१९५२	डेक्कन कालेज पूना।
१७. कातन्त्रविभ्रमः	वि० अ० १९८४	जैनबन्धुयन्त्रालयः, इन्दौर।
१८. कातन्त्रवृत्तिः	वङ्गाक्षरेषु मुद्रिता कलिकाता।	
१९. कातन्त्रवृत्तिटीका	वङ्गाक्षरेषु मुद्रिता कलिकाता।	
